M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. 927   563

Title: Tithi Nirnaya

927

Z

	Tithinirnaya.	Title.
	Raghunatha.	Author.
		Editor.
५८०	Sam. 1858.	Year, Vols.
		Publisher.
कर्मकाण्ड		Remark.

९२७

॥श्रीगणेशाय नमः॥ ॥ अथ संवत्सरप्रतिपदादिसर्वतिथिनिर्णयो लिख्यते॥ तत्र मीनसंक्रांतिपश्चात् षोडश घटिका पुण्य
कालः॥ रात्रौ निशीथात्प्राक् परतश्च संक्रमे पूर्वोत्तरदिनार्धं पुण्यकालः॥ निशीथे तु दिनद्वये पुण्यमिति॥ सामान्यनिर्णयः॥
चैत्रशुक्लप्रतिपदि वत्सरारंभः॥ तत्रौदयिकी ग्राह्या॥ दिनद्वये तद्व्याप्तौ अव्याप्तौ वा पूर्वैव॥ चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमे
ऽहनि॥ शुक्लपक्षे समग्रं तु तदा सूर्योदये सति॥१॥ यदा चैत्रे मलमासस्तदा दैवकार्यस्य निषिद्धत्वात् शुद्ध एवारंभः॥ अत्र तैलाभ्यंगो नि
त्यः॥ वत्सरादौ वसंतादौ बलिराज्ये तथैव च॥ तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यते॥२॥ इति वसिष्ठः॥ अस्यामेव नवरात्रारंभः॥ अमा
युक्ता न कर्तव्या प्रतिपच्चंडिकार्चने॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता॥ इति देवीपुराणात्॥ अत्रैव प्रपादानमुक्तं
अतीते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे॥ पुण्येऽह्नि विप्रकथिते प्रपादानं समारभेत्॥ अन्वहं प्रत्यहं जलकुंभो देयः॥ एष
धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः॥ अस्य प्रदानात्सकला मम संतु मनोरथाः॥ गंधोदकतिलैर्मिश्रं सान्नं कुंभं सदक्षिणं॥ पितृ
भ्यः संप्रदास्यामि अक्षय्यमुपतिष्ठतु॥ ३॥ चैत्रशुक्लतृतीयायां गौरीमीश्वरसंयुतां॥ संपूज्य दोलोत्सवं कुर्यात्॥ सा च परयुता
ग्राह्या॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे इति माधवः॥ अत्रैव सौभाग्यशयनव्रतमुक्तं॥ इयं मन्वादिः॥ [illegible] मन्वा
दिनिर्णयो वक्ष्यते॥ पौर्णमासी तृतीया दशमी कृष्णाष्टमी नवमी द्वादशी एकादशी सप्तमी एता मन्वादयः॥ शुक्लपक्षस्थाः॥ पौर्वा
ह्णिकाः॥ कृष्णपक्षस्थास्त्वापराह्णिकाः॥ गरुडवचनात्॥ कालादर्शे पक्षद्वयेप्यपराह्णव्यापिन्यः॥ मलमासे सति शुद्धमास

द्वयेपि कार्यं॥ विषुवायनसंक्रांतिमन्वादिषु युगादिषु॥ विहाय पिंडनिर्वापं सर्वं श्राद्धं समाचरेत्॥४॥ मन्वादिश्राद्धं च नित्यं॥ षण्णव
तिश्राद्धानि नित्यानि॥ अमा मनुयुगसंक्रांतिधृतीपातमहालयाः॥ अन्वष्टक्यं च पूर्वेद्युः षण्णवत्यः प्रकीर्तिताः॥५॥ चै
त्रशुक्लतृतीयामत्स्यजयंती॥ केचित्तु॥ चैत्रे तु शुक्लपंचम्यां भगवान्मीनरूपधृक्॥ ज्येष्ठे तु शुक्लद्वादश्यां कूर्मरूपधरो ह
रिः॥ चैत्रस्य नवम्यां तु हरिर्वाराहरूपधृक्॥ नारसिंहश्चतुर्दश्यां वैशाखे शुक्लपक्षके॥२॥ मासि भाद्रपदे शुक्लद्वादश्यां वा
मनो हरिः॥ वैशाखशुक्लतृतीयायां रामो भार्गवरूपधृक्॥३॥ चैत्रशुक्लनवम्यां तु रामो दाशरथात्मजः॥ नभस्ये तु द्विती
यायां बलभद्रोऽभवद्धरिः॥४॥ श्रावणे बहुलेऽष्टम्यां कृष्णो भूलोकरक्षकः॥ ज्येष्ठशुक्लद्वितीयायां बौद्धः कल्की भवि
ष्यति॥५॥ अत्र मत्स्यवामनौ समरामौ मत्स्यकूर्मौ उभौ पराह्णविभागे॥ कूर्मसिंहौ बौद्धकल्की सायं ते कृष्णो रात्रौ
कालसाम्ये च पूर्वेद्युः॥६॥ कुत्रचिन्मासे दिने वा वतारः॥ तेषां तु कल्पभेदेन व्यवस्था॥ चैत्रशुक्लपंचमी कल्पादिः॥ ब्रह्मणो य
द्दिनस्यादिः कल्पादिः सा प्रकीर्तिता॥ वैशाखस्य तृतीयायां कृष्णायां फाल्गुनस्य च॥ पंचमी चैत्रमासस्य तस्यैवान्त्या
तथा परा॥ शुक्ला त्रयोदशी माघे कार्तिकस्य तु सप्तमी॥ नवमी मार्गशीर्षस्य सप्तैताः संस्मराम्यहं॥ कल्पानामादयः स्मृ
ता॥ दत्तस्याक्षयकारकाः॥ ७॥ मन्वादिवत्॥ चैत्रशुक्लाष्टम्यां भवान्या उत्पत्तिः॥ सा च नवमीयुता ग्राह्या॥ भवानीं यस्तु प
श्यति शुक्लाष्टम्यां मधौ नरः॥ न जातु शोकं लभते सदानंदमयो भवेत्॥ जन्माष्टमी नवमीयुक्ता नवमी चाष्टमीयु

ति॰ नि॰ क्ला नवमी चाष्टमी भैवेत्स्मृतेति भ्रमस्यैव वर्जनात्॥ अशोककलिकाश्चाष्टौ ये पिबंति पुनर्वसौ॥ चैत्रे मासि सिताष्टम्यां न ते शोकम
२ वाप्नुयुः॥ चैत्रशुक्ल नवमी रामनवमी॥ सा मध्याह्नव्यापिनी॥ पुनर्वसुऋक्षसंयुक्ता सा तिथिः सर्वकामदा॥ श्रीरामनवमी प्रोक्ता
कोटिसूर्यग्रहाधिका॥ १॥ चैत्रे शुक्ला तु नवमी पुनर्वसुयुता यदि॥ सैव मध्याह्नयोगेन महापुण्यतमा भवेत्॥ २॥ केवलापि स
दोपोष्या नवमी शश्वदंगमहाद्रुतम्॥ तस्मात्सर्वात्मना सर्वैः कार्यं वै नवमीव्रतम्॥ दिनद्वये मध्याह्नव्याप्तौ तदभावे वा पूर्वदिने॥ पु
नर्वसुऋक्षसंयुक्ता मध्याह्नव्याप्त्यभावे परैव कार्या॥ तदुक्तं माधवीये अगस्त्यसंहितायां॥ नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैः॥ उ
पोषणं नवम्यां च दशम्यां चैव पारणमिति॥ यदा प्रातस्त्रिमुहूर्त्ता नवमी दशमी च क्षयवशात् सूर्योदयात् प्राग्वे समाप्य
ते तदाष्टमीविद्धांत्रैव एकादश्यां निमित्तेनाप्यवश्यं नवमीव्रतांगपारणलोपः स्यात्॥ अतोष्टमीविद्धैव तस्मात्तैः कार्या॥
वैष्णवानां तु अरुणोदयविद्धैकादश्यादेयत्वात्॥ न पारणालोपप्रसंग इति॥ द्वितीये वचनेः॥ कार्येति सूचयति॥ इदं व्रतं नित्यं॥ चै राम॰
त्रशुक्लैकादश्यां दोलोत्सव उक्तो॥ ब्राह्मे॥ चैत्रमासस्य शुक्लायां एकादश्यां तु वैष्णवैः॥ आंदोलनीयो देवेशः सलक्ष्मी २
को महोत्सवैः॥ १॥ द्वादश्यां चैत्रशुक्लायां दमनोत्सवः॥ द्वादश्यां चैत्रमासस्य शुक्लायां दमनोत्सवः॥ बौधायनादिभिः प्रो
क्तो कर्तव्यं प्रतिवत्सरं॥ १॥ त्रिवर्गस्क्तादिभिः कार्यः॥ वह्निर्विरिंच्यो गिरिजा गणेशः फणी विशाखो दिनकृन्महेशः॥ दुर्गां
तिको विश्व हरिः स्मरश्च शर्वः शशी चेति तिथीशाः क्रमात्॥ पारणा द्वादश्याभावे त्रयोदश्यां दमनसमर्पणं॥ चैत्रशुक्ल

त्रयोदश्यां अनंगव्रतं॥ तत्र सा पूर्वा ग्राह्या त्रयोदशी तिथिः॥ पूर्वासिते इति दीपिकोक्तेः॥ चैत्रशुक्लचतुर्दशी पूर्वा ग्राह्या॥
मध्ये श्रावणमासस्य शुक्लायां तु चतुर्दशी॥ सा पराह्णव्यापिनी ग्राह्या नान्या शुक्ला कदाचन॥ पूर्वेद्युर्मुहूर्त्तत्रयव
धे पूर्वा अन्यथोत्तरा॥ चैत्री पौर्णिमा सा त्वनिर्णयात्सरैव॥ मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका॥ तत्राश्वमेधिकं पुण्यं स्ना
नश्राद्धादिभिर्भवेत्॥ इति॥ संवत्सरकृतार्चायाः साफल्याय खिलं तु रात्॥ दमनेनार्पयेच्चैत्र्यां विशेषेण सदा त्रिवं॥ चैत्र
कृष्णत्रयोदश्यां शनौ शतभिषायुते॥ वारुणीति समाख्याता शुनेतुमहतीस्मृता॥ अत्र पूर्वा ग्राह्या॥ कृष्णपक्षत्वात्॥
इति चैत्रमासनिर्णयः॥ अथ वैशाखः॥ मेषसंक्रमात्सौशे वैशाखः॥ तत्र प्रागपरा दशघटिकाः पुण्यकालः॥ रा
त्रौ तु प्राग्युक्तवत्॥ चैत्रशुक्लैकादश्यां नौशे वैशाखस्नानारंभः॥ मेषगो रपक्षे मलमासो वैशाखो भवति तदा मलमासे
णवन्नतादिसमाप्तिः॥ वैशाखशुक्लतृतीया अक्षय्यतृतीया पूर्वाह्णव्यापिनी ग्राह्या दिनद्वयेपि तद्व्याप्तौ पूर्वैव॥ वैशा
खशुक्लपक्षे तु तृतीया रोहिणीयुता॥ दुर्लभा बुधवारेण सोमेनापि युता तथा॥ रोहिणी बुधयुक्तापि पूर्वविद्धा वि
वर्जिता॥ गौरी विनायकोपेता रोहिणी बुधसंयुता॥ विनापि रोहिणी योगात् पुण्यकोटिप्रदा सतेति॥ इयं युगादिरपि
साचोक्तारत्नमालायां॥ माघे पंचदशी कृष्णा नभस्ये च त्रयोदशी॥ तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः इति॥
पूर्वाह्णे तु सदा कार्याः शुक्ला मनुयुगादयः॥ दैवे कर्मणि पित्र्ये च कृष्णे चैवापराह्णिके इति॥ तृतीयामामाजलकुंभ

दानं॥ एवंधर्मघटो दत्तो ब्रह्माविष्णुशिवात्मकः॥ अस्य प्रदानात्तृप्यंतु पितरश्च पितामहाः॥ अयनद्वितये श्राद्धं। इ विषु
वद्वितये तथा॥ युगादिषु च सर्वासु पिंडनिर्वपणादृते॥ इयमेव तृतीया परशुरामजयंती॥ सा प्रदोषव्यापिनी ग्राह्या॥
द्विनद्वये तद्व्याप्तौ अंशतः समव्याप्तौ च परा॥ वैशाखसितेपक्षे तृतीयायां पुनर्वसौ॥ निशायाः प्रथमे यामे रामा
ख्यसमयेहरिः॥ शुक्ले तृतीया वैशाखे शुद्धा पोष्या द्विनद्वये॥ निशायां पूर्वयामे चेदुत्तरान्यत्र पूर्विका॥ इ
तिनिर्णयः॥ चैत्राष्टमी माघसिताष्टमी च दुर्गाष्टमी चाश्विनजाष्टमी च॥ एताश्च तस्याः प्रथमे क्रियाः कुर्यात् वैशाखमास
स्य च यात्तमिमिसिनि॥ वैशाखशुक्ल सप्तम्यां गंगोत्पत्तिः॥ अत्र शिष्टाचारान्मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वयेत
द्व्याप्ता वव्याप्तौ वेकदेशव्याप्तौ वा पूर्वयुग्म वाक्यात्॥ वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा॥ क्रोधात्पी
ता पुनस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्॥ तां तत्र पूजयेद्देवीं गंगां गगनमेखलां॥ वैशाखशुक्ल चतुर्दशी नृसिंहजयंती
सा प्रदोषव्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तावंशतः समव्याप्तौ च परा विषमव्याप्तौ त्वधिकव्याप्तिमतिदिन द्वयेप्यव्या
प्तौ परा॥ वैशाखशुक्लपक्षे तु चतुर्दश्यां निशामुखे॥ मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं॥ वर्षे वर्षे तु कर्तव्यं मम संतु
ष्टिकारकं॥ वैशाखस्य चतुर्दश्यां सोमवारे निलर्क्षके॥ अवतारो नृसिंहस्य प्रदोषसमये द्विजाः॥ स्वाती नक्षत्रयोगे शु
चनानि वारे तु मद्व्रतं॥ सिद्धयोगस्य संयोगे वणिजे करणे तथा॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः॥ टोटोड राम. ३

रानंदेस्कंदात्॥ वैशाख्यां पौर्णमास्यां धर्मराजाय उदकं दद्यात्॥ इति वैशाखः॥ अथ ज्येष्ठः॥ वृषसंक्रांतौ सौरो ज्येष्ठः॥ तत्र पूर्वाः
षोडशघटिकाः पुण्यकालः॥ रात्रौ तु प्राग्वत्॥ ज्येष्ठशुक्लतृतीयां रंभाव्रतं सा पूर्वविद्धा ग्राह्या॥ व्रतं तत्तपात तथा रंभाव्र
तं सावित्रीव्रतं पैत्रीकी॥ कृष्णाष्टमी चभूतावकर्तव्या संमुखातिथिरिति स्कांदोक्तेः॥ ज्येष्ठशुक्ल दशमी दशहरा सा पूर्व
विद्धा दशहराव्रते त्वधिकयोगवती ग्राह्या॥ ज्येष्ठे मासे सिते पक्षे दशम्यां बुध हस्तयोः॥ व्यतीपाते गरानंदे कन्याचंद्रे
वृषे रवौ॥ दशयोगे नरः स्नात्वा सर्वपापैः प्रमुच्यते॥ इयं च मन्वंतरे वयोगबाहुल्ये वग्राह्या॥ ज्येष्ठशुक्लैकादशी निर्ज
ला॥ ज्येष्ठपौर्णमास्यां सावित्रीव्रतं॥ ज्येष्ठे मासे सिते पक्षे द्वादश्यां रजनीमुखे॥ व्रते त्रिरात्रमुद्दिश्य दिवारात्रं स्थिता भवेत्
इमां पौतु नारदपद्मोक्तम्॥ तत्र नेदानीं प्रवर्तंति॥ निर्णयामृते॥ अमायामप्युक्तं॥ अत्र पौर्णिमामावास्येति पू
र्वविद्धा ग्राह्या॥ भूतविद्धा न कर्तव्या अमावास्या च पौर्णिमा॥ वर्जयित्वा सुरश्रेष्ठ सावित्री व्रतमुत्तमं॥ भूतविद्धा सिनी
वाली न तु नर्त्ते व्रतं चरेत्॥ वर्जयित्वा तु सावित्रीव्रतं तु त्रिःखीवा हनि॥ यदा त्वष्टादशघटिकाश्च चतुर्दशी तदा परा ग्राह्या
पूर्वविद्धं वै सावित्रीव्रतं पंचदश्यां तिथिः॥ नाज्यो ह्ये ष्टादशभूते स्यसु स्थेव नार्हिपरेहनि॥ तिथिवस्तु तत्र पूर्वविद्धादि
धायक वचने न तस्य बाधा दष्टादश नाडिका विधिपि पूर्वैव तिथि॥ इयं मन्वादिरपि॥ सा पौर्वाह्णिकी ग्राह्या॥ विशेषश्चैत्रेऽत
रुक्तः॥ त्रिविक्रमप्रीत्यर्थं उदकुंभं दद्यात्॥ इति ज्येष्ठः॥ अथ आषाढमासे॥ मिथुनसंक्रांतौ परा षोडशघटिकाः पुण्य

तिथिनि· कालः॥ रात्रौ प्राग्वत्॥ आषाढशुक्लद्वितीयायां रथोत्सवः॥ आषाढस्य सिते पक्षे द्वितीया पुष्यसंयुता॥ तस्यां रथे समा
४ रोप्य रामं मां भद्रया सह॥ यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून्॥ आषाढशुक्लदशमी पौर्णमासी च मन्वादिः
सा च पूर्वाह्णव्यापिनीति प्रागुक्तं॥ आषाढशुक्लैकादश्यां विष्णुशयनोत्सवः॥ एकादश्यां तु शुक्लायामाषाढे भ
ले· गवान्हरिः॥ भुजंगशयने शेते क्षीरार्णवजले सदा॥ इति हेमाद्रौ॥ द्वादश्यामिति वराहोक्तेः॥ इदं मलमासे न
कार्यं॥ अत्रैव चातुर्मास्यव्रतारंभः॥ आषाढे तु सिते पक्षे एकादश्यामुपोषितः॥ चातुर्मास्यव्रतं कुर्यात् यत्किंचि
न्नियतो नरः इति॥ अस्यारंभः शुक्रास्तादावपि कार्यः॥ प्रथमारंभस्तु न भवत्येव॥ आशौचमध्येपि द्वितीयारंभो भव
त्येव॥ आशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्॥ व्रतमेतन्नरः कुर्याद्विमुच्यते सर्वपातकैः॥ इति॥ आरब्धे सू
तकं न स्यादनारब्धे तु सूतकमिति॥ आषाढपूर्णमास्यां शिवशयनोत्सवं॥ इयं सा प्रदोषव्यापिनी ग्राह्या॥ पौर्णि राम· ४
मास्यामुमानाथ शेते वै चर्मसंस्तरे॥ वैयाघ्रे॥ त्रिदेवाचन्द्रसंयुक्तो भानोर्वा गणनायके॥ कृत्वात्र तस्य नियमं य
थोक्तफलभाग्भवेत्॥ श्रावणे वर्जयेच्छाकं दधि भाद्रपदे तथा॥ दुग्धमाश्वयुजे मासि कार्तिके द्विदलं त्यजेत्॥ स्कांदे
पि॥ वलायितानि निसानि चतुराश्रमवर्णिनां॥ श्रावणे वर्जयेच्छाकं॥ तत्र॥ मूलपत्रकरीराग्रफलकांडाधिरू
ढकं॥ त्वक्पुष्पं कुवचं चेति शाकं दशविधं स्मृतं॥ आधिरूढं अंकुरः॥ ब्रह्मचर्यं तथा शौचं सत्यमामिषवर्जनं॥ व्र

तेष्येतानि चत्वारि वरिष्ठानीति निश्चयः॥ आमिषाणि चोक्तानि रामार्चनचंद्रिकायां॥ प्राणंगचूर्णं चर्माम्बु जंबीरं बीजपू
रकं॥ अयज्ञशिष्टं माषादि यच्छिष्टमनिवेदितं॥ हस्तमन्नं मसूरं च मांसं चेत्यष्टधामिषं॥ कृत्वांते तद्देशजन्यं सुरैदैवे विवर्जयेदि
ति॥ गोच्छागीमहिषीभूतादन्यदुग्धामिषामिषं॥ धान्ये मसूरिकाप्रोक्ता अन्नं पर्युषितं तथा॥ द्विजक्रीता रसाः सर्वे लव
णं भूमिजं तथा॥ ताम्रपात्रस्थितं गव्यं जलं पल्वलसंस्थितं॥ आत्मार्थं पाचितं चान्नं आमिषं तत्स्मृतं बुधैः॥ नीवारान्नराज
माषांश्च मसूरं संधितानि च॥ हंताकं च कलिंगं च सुस्तेदेवे विवर्जयेत्॥ संधितानि लवणशाकादीनि॥ चतुर्थपीह मासेषु
हविष्याशी न पापभाक्॥ हविष्याणि स्मृतिचंद्रोदये॥ हैमंतिकं सिता स्विन्नं धान्यं मुद्गा यवास्तिलाः॥ कलायकंगुनीवा
रवास्तूकं हिलमोचिका॥ षष्टिका कालशाकं च मूलकं केमुकेतरत्॥ कंदं सैंधवसामुद्रे गव्ये च दधिसर्पिषी॥ पयोनुदृतसा
रं च पनसाम्रहरीतकी॥ पिप्पलीजीरकं चैव नागरं च मरीचकं॥ कदलीलवलीधात्रीफलान्यगुडमैक्षवं॥ अतैलपक्वं
मुनयो हविष्याणि प्रचक्षते॥ रामार्चनचंद्रिकायां॥ भविष्ये॥ शयन्यां चैव बोधिन्यां चक्रतीर्थे तथैव च॥ शंखचक्रादि
धारणेन वह्निरेतोऽभवेन्नरः॥ इति॥ तप्तुर्वेदाक्षरविदितानामिति॥ आषाढशुक्लपादद्वयं॥ आनाकासितपक्षेषु भुमे
त्रश्रवणरेवती॥ संगवेन दृष्टौ क्रव्याद्वाद्या द्वादशीं हरेत्॥ १॥ तत्राप्यनुराधा प्रथमपादमेव वर्ज्यं पारणं कुर्यात्
आषाढपौर्णमास्यां कोकिलाव्रतं॥ अस्य नक्तव्रतत्वात्सायाह्नव्यापिनी ग्राह्या॥ अत्रैव व्यासपूजोक्ता॥ तत्र त्रिमुहूर

ति॰नि॰ ५ त्रीयै परैवेति सम्पूर्णस्य पक्षतौ॥ त्रिमुहूर्ताधिके ग्राह्ये पर्वक्षौरश्रमाणयोः॥ इति आषाढः॥ अथ श्रावणमासः॥ कर्कसंक्रांतौ त्रिं
शन्नाड्यः पुण्यकालः॥ सूर्योदयोत्तसंक्रमे तु पुरत एव पुण्यकालः॥ रात्रौ तु निशीथात्प्राक् परतश्च संक्रमे परार्द्धे हेमाद्र्यादिमते
पूर्वोत्तरदिनयोः पंच पंच नाड्यः पुण्यकालः॥ धनुर्मीनावतिक्रम्य कन्यां च मिथुनं तथा॥ पूर्वापरविभागेन रात्रौ संक्र
मते रविः॥ दिनांते पंचनाड्यस्तु स्युस्ताः पुण्यतमाः स्मृताः॥ उदयेपि तथा पंच दैवे पित्र्ये च कर्मणीति॥ माधवमते तु॥ अर्धरात्रे तदूर्
ध्वं वा संक्रांतौ दक्षिणायने॥ पूर्वमेव दिनं ग्राह्यं यावन्नोदयते रविरिति॥ सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः॥ तासु स्
नानं न कुर्वीत वर्जयित्वा समुद्रगाः॥ महानद्यस्तु गोदावरी भीमरथी तुंगभद्रा च वेणिका॥ तापी पयोष्णी विंध्यस्य दक्षि
णे प्रकीर्तिताः॥ भागीरथी नर्मदा च यमुना सरस्वती॥ विशोका च वितस्ता च विंध्यस्योत्तरतः स्थिताः॥ महानदीषु तु
न विषिद्धं॥ आदौ कर्कटे देवी महानद्यो रजस्वलाः॥ त्रिदिनं च चतुर्थेह्नि शुद्धाः स्युर्जाह्नवी यथा॥ इदं गंगादिरिक्तविष
यं॥ गंगा च यमुना चैव प्लक्षजाता सरस्वती॥ रजसा नाभिभूयंते ये चान्ये नदसंज्ञिताः॥ इति॥ श्रावणशुक्लतृतीयायां राम॰
मधुस्रवा स्वर्णगुर्जरेषु प्रसिद्धा॥ सा परयुता ग्राह्या॥ श्रावणशुक्लचतुर्थी पूर्वयुता मातृविद्धा गणेश्वर इत्यादिवचनात् ५
श्रावणशुक्लपंचमी नागपूजादिषु दैवपरैव ग्राह्या॥ पंचमी नागपूजायां कार्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा इतरा स
चतुर्थिका॥ श्रावणे पंचमी शुक्ला संप्रोक्ता नागपंचमी॥ तां परित्यज्य पंचम्यां चतुर्थी सहिता इति॥ श्रावणशुक्ल

द्वादश्यां दधिव्रतं प्रागुक्तं॥ श्रावणशुक्लद्वादश्यां विष्णोः पवित्रारोपणमुक्तं॥ हेमाद्रौ विष्णुरहस्ये॥ श्रावणसिते पक्षे कर्कटस्थे दिवाक
रे॥ द्वादश्यां वासुदेवाय पवित्रारोपणं स्मृतं॥ द्वादश्यां श्रवणे वापि पंचम्यामथवा द्विजाः॥ आनुकूल्येषु कर्तव्यं पंचदश्यामथापि वा॥
पवित्रारोपणं विप्रा ह्याश्रवणेन भवेद्यदि॥ कार्तिक्यां वाधिशुक्लायां कर्तव्यमिति नारदः॥ शिवे इति तत्रैव कालोत्तरे॥ आषाढां
ते चतुर्दश्यां नभस्ये नभसोस्तथा॥ अष्टम्यां वा चतुर्दश्यां पक्षयोरुभयोः समं॥ हेमरौप्यताम्रक्षौमैः सूत्रैः कौशेयपद्मजैः॥ कु
शैः काशैश्च कार्पासैः ब्राह्मण्याः कर्तितैः शुभैः॥ सर्वे घादिकार्तिक्यां चाधिकोन॥ उत्तमं तु शतग्रंथि पंचाशद्ग्रंथि मध्यमं॥ कनिष्ठं
तु पवित्रं स्यात् षट्त्रिंशद्ग्रंथिसंयुतं॥ षट्त्रिंशत्तु चतुर्विंशत् द्वादशेति च केचन॥ चतुर्विंशद्वादशाष्टौ विसके मुनयो विदुः॥
हेमाद्रौ तु॥ अष्टोत्तरशते कुर्याच्चतुःपंचाशदेव वा॥ सप्तविंशतिरेवाथ ज्येष्ठमध्यकनीयसां॥ अधमं नाभिमात्रं स्यादूरुमा
त्रं द्वितीयकं॥ प्रलंबतोजानुमात्रं प्रतिमायां निगद्यते॥ शिवे तु॥ द्वादशांगुलमानानि व्यासादष्टांगुलानि वा॥ लिंगविस्तरमा
नानि चतुरंगुलकानि वेति॥ ब्राह्मणक्षत्रियो वैश्यस्तथा स्त्रीशूद्रएन वा॥ स्वस्वधर्मव्यवस्थिताः सर्वेपि स्युः कुर्युः पवित्रकं॥
न करोति विधानेन पवित्रारोपणं सुत॥ तस्य सांवत्सरी पूजा निष्फला मुनिसत्तमाः॥ चतुर्दश्यामथाष्टम्यां सर्वसाधारणं तु
तदिति॥ मासपक्षमहोरात्रं त्रिरात्रं धारयेत्तथा॥ इति पवित्रारोपः॥ श्रावणशुक्लचतुर्दशी पूर्वयुता ग्राह्या॥ अत्र वृक्षकोटि
रस्तु चैत्रचतुर्दश्या मुक्तः॥ अथोपाकर्मप्रयोगपारिजाते शौनकः॥ अथातः श्रावणे मासि श्रवणर्क्षयुते दिने॥ श्रा

ति.त्रि
६

वण्यां श्रवणे माभूदिति चर्मण्वत्स्मृतेः ॥ धनिष्ठासंयुतः कुर्यात् श्रावण्यां श्रवणेन तु ॥ तत्कर्म सफलं ज्ञेयं उपाकरणसंज्ञितं
ग्रामस्योत्तरभागे तु कर्तव्यं सिंहयुक्तके ॥ कर्कटे संस्थिते भानौ नूनं कुर्यात्तु दक्षिणे ॥ पर्वण्यौदयिके कुर्युः श्रावण्यां तैत्तिरीयकाः ॥
बह्वृचाः श्रवणे कुर्युः ग्रहसंक्रान्तिवर्जिते ॥ केचित्तैत्तिरीयकाणां उपासनवह्नौ वा गतत्राण्यध्यायेरन्या गच्छेतिस्तत्राकानि श्रुत्वेत
दृष्टिकारिकस्याचार्यश्रीनाम्नस्य श्रावत्योः कृष्णपादि तिथौ निषेधा होमंकि केऽण वा ॥ ग्रहसंक्रान्तियुक्ते तु स्तश्रवणवर्जिते
ति हेमाद्रौ ॥ निषेधात्तं चमत्कारयोग्यस्य ॥ तत्तु देशान्तरविषयं ॥ नर्मदोत्तरस्याने तु कर्तव्यं तैत्तिरीयकाः ॥ बह्वृचाः श्रवणे कुर्युः ए
तेषां तु कालस्ता एव विकार्यः ॥ उपाकर्मोत्सर्जनं च पवित्रदमनार्पणं ॥ नित्यं नैमित्तिके जाप्ये होमयज्ञक्रियासु च ॥ उपा
कर्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥ इति प्रयोगपारिजातः ॥ तथाधिकमासे न कार्यं ॥ उपाकर्म महःपरा कृत्स्या कुत्स गंभ्रा त
रेवहिः ॥ इति सामकविषयं ॥ वस्तुतः पूर्वाह्ण एव कर्तव्यं ॥ अत्रैव प्रसंगादुत्सर्जनं ॥ सदैकरूपाकर्मदिने कार्यं ॥ पूर्वे द्युरुत्स
र्जनं कुर्यादुपाकर्मदिनेऽथवेति हेमाद्रौ ॥ अत्रैवोपाकर्मणि तूत्सर्गे च त्रिरात्रं पक्षिणी अहोरात्रं वा अनध्यायः कर्तव्य इ राम
ति ॥ अत्रैव रक्षाबंधनमुक्तं हेमाद्रौ ॥ इदं भद्रायां न कार्यं ॥ भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथा ॥ श्रावणी रा ६
जनं ग्रामं दहति फाल्गुनी ॥ श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी ॥ पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दिनमि
ति ॥ तत्र स्तवे पितुरन्नाव पितृदंते कुर्यादिति निर्णयामृते ॥ तत्रास्तसमये योनिश्रस्या ॥ अस्तमिते स्यानी पाकं श्रपयि ह

५

ति ॥ केचित्तु विकृतिलाठे ऋषयं पर्वे च ॥ श्रावणमासस्य तु कृष्णपक्षद्वितीयायां तु अशून्यशयनव्रतं ॥ तत्र चन्द्रोदयव्यापिनी ग्रा
ह्या ॥ दिनद्वये पि सत्त्वे परेति निर्णयामृते ॥ श्रावणकृष्णतृतीया कज्जलीसंज्ञा सा पराग्राह्या ॥ श्रावणकृष्णचतुर्थी
बहुला रख्या मध्याह्ने शोषिता ॥ सायाह्नव्यापिनी ग्राह्या ॥ दिनद्वये तत्त्वे पूर्वा ग्राह्या ॥ गौर्व्याघ्रश्च तुर्थी वटधेनुपूजा दु
र्गा गौरीव्रतं दुर्वरहोलिका च ॥ वत्सस्य पूजा व्रतं शिवरात्रि रेताः पराह्नमिताह्नं ति नृपं सराद्यमिति दिवोदासात् ॥ श्रावण
कृष्णषष्ठी चन्द्रषष्ठी सा सप्तमी युतेति श्रावणकृष्णस्य सप्तम्यां वामृशीतलाव्रतं तत्र पूर्वा ग्राह्येति ॥ अथ श्रावणकृष्णा
ष्टमी जन्माष्टमी ॥ अत्र माधवः ॥ अष्टमी द्विधा जन्माष्टमी जयन्ती चेति ॥ तत्राद्या केवला जन्माष्टमी ॥ सैव रोहिणीयुक्ता जयं
ती ॥ कृष्णाष्टम्यां भवेद्यत्र कालैका रोहिणी यदि ॥ जयन्ती नाम सा प्रोक्ता उपोष्या सा प्रयत्नतः ॥ इति वह्नि
पुराणात् ॥ रोहिणीयोगश्चाहोरात्रं मुख्यः ॥ निशीथमात्रे मध्यमः ॥ दिवसाधमः ॥ अहोरात्रं तयोर्योगे ह्यसंपू
र्णो भवेद्यदि ॥ मुहूर्तमप्यहोरात्रे योगश्चेत्तामुपोषयेत् ॥ इति वसिष्ठसंहितोक्तेः ॥ वासरे वा निशायां वा यत्र स्व
ल्पापि रोहिणी ॥ विशेषेण नभो मासि सैवोपोष्या मनीषिभिरिति पुराणोक्तेश्च ॥ तत्र जन्माष्टमीव्रतं ॥ नित्यं काम्यं
च ॥ यदा चरोहिणीयोगस्तदा जन्माष्टमी जयन्तीसमं तन्नूता ॥ यस्मिन्वर्षे जयन्त्याख्यो योगो जन्माष्टमी सदा ॥ अन्त
र्भूता जयन्त्यस्यां दृष्टो योगः प्रजापतेः ॥ हेमाद्रिस्तु ॥ रोहिणीसहितापोष्या सर्वाघौघविनाशिनी ॥ इति अग्निपुरा
दृणे

ति॰नि॰ णात्॥ अर्द्धरात्रएवरोहिणीयोगस्य प्रशस्तरूपत्वात्॥ मुहूर्त्तमपिलभ्यते त्यादिना चार्धरात्रयोगोप्युपपद्यते॥ तदाज
७ यंतीव्रतं॥ नभिन्नं॥ रोहिण्यामर्धरात्रे च यदाकृष्णाष्टमीभवेत्॥ तस्यामभ्यर्चनं शौरेर्हंति पापं त्रिजन्मजमिति॥ परदिने
सर्वस्यापिरोहिणीयोगस्य अभावे जातं अन्यथा बुधवारादेरपि ततत्पक्षेः॥ उदयेचाष्टमीकिंचिन्नवमी सकलायदि॥ भवे
द्बुधसंयुक्ता प्राजापत्यर्क्षसंयुता॥ अपिवर्षशतेनापिलभ्यते वायवा न वेति॥ तदानादिविषयं॥ उदयेचंद्रोदयेयं दिद्युतिर
श्री तु वचं॥ अत्रनिशीथएकाग्रे खः॥ अष्टमीरोहिणीयुक्ता निश्यर्धे दृश्यते यदि॥ मुख्यकालइतिख्यात तत्रजातो हरिः स्वयमिति
वसिष्ठसंहितोक्तेश्च॥ तत्र अष्टमीद्विधा तरोहिणीरहिता तद्युक्ताच॥ आद्यापिसा चतुर्विधा॥ पूर्वेद्युरेव निशीथव्यापिनी
परेद्युरुभयेद्युश्चेति॥ तत्राद्यमो स्कंदेहएव॥ कर्मकालव्याप्तेः॥ अंत्ययोः परेद्युरेव॥ ततः संकल्पकालव्याप्तेराधिक्या
त्॥ वर्जनीयाप्रयत्नेन सप्तमीसंयुताष्टमीति ब्रह्मवैवर्तोक्तेः एवं मन्वंतरतः समव्याप्तावपिविषमव्याप्तौ व्याधिकेन निर्ण
यः॥ रोहिणीयुक्तापिचतुर्धा॥ पूर्वेद्युरेवनिशीथे रोहिणीयुताष्टमी पूर्वेद्युपरेद्युरुभयेद्युश्च॥ अत्राप्याद्ययोः संदेहः॥ कामि
कापिरोहिणीसहिताष्टमीतिपाद्मोक्तेः॥ उभयेद्युरेव ततीयपक्षे परेव॥ वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी॥ स राम॰ ७
ऋक्षापिन कर्तव्या सप्तमीसंयुताष्टमी॥ तिब्रह्मवैवर्तात्॥ परेद्युर्निशीथेऽऋक्षाष्टमायोगे सतितेषं॥ चतुर्थेपि त्रेधा
पूर्वेद्युर्निशीथेष्टमीपरेद्युरृक्षरोहिणीपरेद्युरष्टमीपूर्वेऋक्षरोहिणी उभयेद्युरुभयस्पनिशीथासंबंधात्॥ अद्य

५

५

द्यपरेद्युर्जयंतीयोगस्यसत्वात्परेव॥ इतिमाधवः॥ यस्मिन्व[illegible]र्षेप्यारव्यः योगोजन्माष्टमीतदा॥ अंतर्भूताजयंत्यास्याः दक्षयेमाः प्र
शस्यते॥ इति॥ पूर्वविद्धाष्टमीयातु उभयेद्युनवमीदिने॥ मुहूर्त्तमपि संयुक्ता संपूर्णासाष्टमी भवेत्॥ कलाकाष्ठामुहूर्त्तोपि यदा
कृष्णाष्टमीतिथिः॥ नवम्यां सैवग्राह्या स्यात्सप्तमीसंयुता नहीतिपाद्मोक्तेश्च॥ हेमाद्रिस्त्वाह॥ अष्टम्याः प्राधान्यात्तस्याश्च पूर्वेद्युः
कर्मकालव्याप्तित्वात्पूर्वैव॥ सा यत्तु पूर्वेद्यु निशीथे अष्टम्याभावे तेयं॥ निवादित्यसंप्रदायिनो मौदयिकीं वा॥ उदयव्यापिनी
ग्राह्या कुलेतिथिरुपोषणे॥ निवाकोयं नवेद्यो गोवांछितार्थफलप्रद इतिब्रतदे माद्री निवसत्समीव्रते भविष्योक्तेः॥ एवंत्रि
वरात्र्यादावपि अंत्ययोः परेव॥ सप्तमीसंयुताष्टम्यां भूता ऋक्षद्विजोत्तम॥ प्राजापत्यं द्वितीयेह्नि भूतात्रे मुहूर्त्तार्धमवेद्य
दि॥ तदाष्टमासिकं पुण्यं प्रोक्तं व्यासादिभिः पुरा॥ तिस्कांदात्॥ मुहूर्त्तेनापि संयुक्ता पूर्णा साष्टमीभवेत्॥ किंपुनर्नव
मीयुक्ता कुलकोट्यास्तुमुक्तिदेति॥ पाद्मोक्तेः॥ नत्वर्धरात्रेयोगोयं तारापत्युदयेसति॥ इत्यादिवाक्यादर्धरात्रे रुन्नाचं
द्रोदयेदानादिरूक्तः तास्तरदिनोपवासे तत्रापि विद्यते इतिचेन्न॥ कृष्णाष्टम्यां त्रावेणाष्टम्यां कृष्णापरोहिणीयदि॥ तदाऽ
तोकारस्येद्रुला मृगेणनवमीसह॥ अर्घ्यमदोयते यत्रो मृगस्पतुनिशाकरे॥ विनाऋक्षेणकर्तव्या नवमीसहिताष्टमी॥
त्यादिपरस्तुएण वाक्यमिति॥ पारणं तु॥ तिथ्यिंर ब्रहुणं हंति नक्षत्रं तमथापिवा॥ अर्धरात्रेपवाकुर्यात्पारणं त्वपरे
द्युनीति॥ सदेवित्येपवासेषु दिवापारणमिष्यते॥ इतितदन्यविषयं॥ अत्राऽजंतकार्यं॥ जयंत्यांपूर्वविद्धायां

तिथिनि॰ पवासं समाचरेत्॥ तिथ्यंते चोत्सवांते वा व्रती कुर्वीत पारणं॥ इति जन्माष्टमी॥ श्रावणमासस्य अमायां। कुशग्रह
८ णमुक्तं। हारितेन॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः॥ नभः श्रावणः॥ तेन दर्शांतमासे जन्माष्टम्यनंतरं द
र्भो लभ्यते॥ मदनरत्ने तु॥ नभस्यो भाद्रपदः सो न मुख्यः तदंतर्गत दर्भो लभ्यते॥ एवमन्यान्यपि तृतीयाव्रतानि चतु
र्थीयुक्तान्येव कार्याणि इति सिद्धांतेः॥ इति श्रावणमासः॥ अथ भाद्रपदमासः॥ सिंहे परः षोडश घटिकाः पुण्यका
लः॥ अन्यत्पूर्ववत्॥ भानोः सिंहगते चैव यस्य गौः संप्रसूयते॥ मरणं तस्य निर्दिष्टं षड्भिर्मासैर्न संशयः॥ इति॥ गोः
प्रसवे नारदः॥ प्रसूतां तत्क्षणादेव तां गां विप्राय दापयेत्॥ ततो व्याहृतिहोमं कुर्यात्॥ माघे बुधे च महिषी श्रावणे व
डवा दिवा॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायकाः॥ इति॥ भाद्रपदशुक्लतृतीयायां हरितालिकाव्रतं॥ तत्र मुहू
र्तमात्रापि परा ग्राह्या॥ मुहूर्तमात्रसत्वेपि दिने गौरीव्रतं परे॥ शुद्धाधिकायामप्येवं गणयोगप्रशंसनात्॥ इति माध
वोक्तेः॥ आद्या मधुश्रावणी च कज्जली हरितालिकाः॥ चतुर्थीमिश्रितास्त्रीभिर्दिवानक्तं विधीयते॥ भाद्रपदच राम॰
तुर्थ्यां वरदचतुर्थीव्रतं सा पूर्वा ग्राह्या॥ चतुर्थी गणनाथस्य संगतां तेपरेहनि॥ यदि तस्यास्तदा पूर्वा कर्त्तव्या शुभ ८
कांक्षिभिः॥ तत्र मध्याह्नव्यापिनी ग्राह्या॥ चतुर्थी गणनाथस्य मातृविद्धा प्रशस्यते॥ मध्याह्नव्यापिनी चेत्स्या
त्परतश्चेत्परेहनि॥ इति॥ तस्यामेव चंद्रदर्शनं निषिद्धं॥ मध्याह्नव्यापिनी तु गणपतिपूजायां मुख्येति निर्णयामृते॥

सिंहः प्रसेनमवधीत्सिंहो जांबवता हतः॥ सुकुमारक मा रोदीस्तव ह्येष स्यमंतकः॥ भाद्रपदशुक्लपंचमी ऋषिपंचमी
सा हि माद्धिमते परा॥ सिता परयुता स्यात् पंचमी तिदीपोक्तेः॥ मुहूर्तद्वितयं वापि पंचमी यदि वा भवेत्॥ ऋषीणां पूजनं चैव
व कर्त्तव्या व्रतिभिः परा॥ इति॥ चतुर्थीसहितायां च पंचम्यामृषिपूजनं॥ व्रतिभिर्नैव कर्त्तव्यं कृतं चेन्निःफलं भवेत्॥ माधवम
ते तु॥ पूर्वास्त्वत्र पंचमी पूर्वेद्युः॥ वस्तुतः मध्याह्नव्यापिनी मुख्या॥ भाद्रपदशुक्लषष्ठी सा एव सप्तमी युतेति॥ शुक्ले भा
द्रपदे षष्ठ्यां स्नानं भास्करपूजनं॥ प्राशनं पंचगव्यस्य अश्वमेधफलाधिकं॥ इति॥ भाद्रपदशुक्लाष्टमी दुर्वाष्टमी सा पू
र्वा ग्राह्या॥ श्रावणी दुर्गानवमी तिवत्सनात्॥ भाद्रशुक्लाष्टमी ज्येष्ठायोगवर्ज्या न पूर्वा परा ग्राह्या। दिनद्वययोगे परा॥
पूर्वेद्युरात्रियोगे पूर्वैव॥ मैत्रेण बाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तमं॥ शुक्ला
ष्टमी तिथिर्या तु मासि भाद्रपदे तथा॥ भवेत्॥ दुर्वाष्टमी तु सा ज्ञेया नोत्तरा विसा विधीयते॥ इति पुराणात्॥ मनु॥
मुहूर्ते रोहिणी ष्टम्यां पूर्वा वा यदि वा परा॥ दुर्वाष्टमी तु सा कुर्यात् ज्येष्ठामूलं च वर्जयेत्॥ इति तत्रैव॥ अपरार्क
कार्ये तूक्तं॥ तत्पूर्वेद्युर्ज्येष्ठादियोगे द्रष्टव्यं॥ दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुता॥ इंद्रेणचाग्रस्तोदयेक
न्या केन्वि कार्यमिति हेमाद्रिः॥ इदं व्रतं स्त्रीणां नित्यं न पूजये तद् दूर्वा निर्मोहादिदृष्टव्या विधिः॥ स्त्रीणां जन्मातिवैध
व्यं जन्मेतेनात्र संशयः॥ यदा ज्येष्ठादिकं विना त्रष्टमी न लभ्यते तदा॥ दूर्वा मध्यमर्च्य ये ज्ञ त्या न वर्ज्या दिवसेन
६ मैत्रविद्धा तु या ज्येष्ठा सर्वसिद्धिप्रदायिनी मूलविद्धा निषिद्धा स्यादिति चंद्रिकायां ६

तिथिति॰ ९

ये त्॥ अत्र विधिर्मदनरत्ने न विष्णौ॥ अत्रैव ज्येष्ठापूजा॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुते॥ यस्मिन्कस्मिन्दिने
आर्याः ज्येष्ठायाः परिपूजनं॥ इयं ज्येष्ठायोगवशेन पूर्वापरा वा कार्या॥ दिनद्वययोगे परा कार्या॥ पूर्वेद्युरात्रियोगे पूर्वैव
मूले विसर्जयेत्॥ भाद्रपदशुक्लैकादश्यां श्रवणयुक्तायां वामनावतारः॥ सा मध्याह्नव्यापिनी ग्राह्या॥ भाद्रपदशुक्ल
द्वादश्यां वा श्रवणे एकदेशोपवासः॥ विष्णुधर्मोत्तरे॥ या राम श्रवणोपेता द्वादशी महती तु सा॥ तस्यामुपोषितः स्नात
तः पूजयित्वा जनार्दनं॥ तिथिनक्षत्रयोर्योगो योगश्चैव नराधिप॥ द्विकलो यदि लभ्येत स ज्ञेयो ह्यष्टयामिकः॥ मासि
भाद्रपदे शुक्ला द्वादशी श्रवणान्विता॥ महती द्वादशी ज्ञेया उपवासे महाफला॥ उपोष्यैकादशीं तस्यां पारणं श्र
वणे यदि॥ करोति द्विगुणं तच्च द्वादशैर्द्वादशीं हरेत्॥ अत्र शुक्ले न तु मध्यमविंशतिघटिकाः सत्त्वे पारणं कुर्यात्
॥ इयमेव श्रवणद्वादशी॥ एकादश्यां श्रवणे द्वादशी श्रवणयोगे विष्णुशृंखलं नाम॥ द्वादशी श्रवणस्पृष्टा स्पृशे
देकादशीं यदि॥ स एव वैष्णवो योगो विष्णुशृंखलसंज्ञितं॥ तिथिनक्षत्रसंयोगे उपवासो न वेद्य तु॥ पारणं तु न राम॰ ९
कर्तव्यं यावन्नैकस्य संक्षयः॥ यदा न प्राप्यते ऋक्षं द्वादश्यां वैष्णवं क्वचित्॥ तत्र शुक्लेनोपवासं द्वयं कार्यं एका
दशी तदा कार्या पापघ्नी श्रवणान्विता॥ उभयोर्दैवतं विष्णुः पुराणपुरुषोत्तमः॥ विष्णुदेवत्रनकर्तव्यो विज्ञेयस्तत्पर
तो नरैः॥ द्वादश्यां शुक्लपक्षे तु नक्षत्रं श्रवणं यदि॥ उपोष्यैकादशीं तत्र द्वादश्यां पूजयेद्धरिं॥ एवमेकादशीं भु

क्त्वा द्वादश्यां समुपोषयेत्॥ पूर्ववासरजं पुण्यं सर्वं प्राप्नोत्यसंशयं॥ एकादशीमुपोष्यैव द्वादशीं समुपोषयेत्॥ न तत्र
विधिलोपः स्यादुभयोर्देवतं हरिः॥ उपवासद्वयं कर्तुं न शक्नोति नरो यदि॥ प्रथमेह्नि फलाहारी निराहारो परेहनि॥ पा
रणं तिथिवृद्धौ तु द्वादश्यामुद्धसंक्षयात्॥ वृद्धौ कुर्यात्त्रयोदश्यां तत्र दोषो न विद्यते॥ इति वामनजयंती॥ श्रवणयुत
शुद्धैकादश्यां जाते तु द्वादशी विद्धा श्रवणयुता कार्या॥ इति मदनरत्ने स्फुटं॥ श्रवणैकादश्यां वामनपूजा मध्याह्ने॥ इति
श्रवणद्वादशी॥ अत्रैव विष्णुपरिवर्तनोत्सवं॥ वासुदेव जगन्नाथ प्राप्तेयं द्वादशी तव॥ पार्श्वेन परिवर्तस्व सुखं
स्वपिहि माधव॥ इति॥ अत्रैव दुग्धव्रतं संकल्प्य त्यजेत्॥ पायसं न वर्ज्यं॥ प्रकृतिस्थोपलंभनात् तद्वर्जनमिति तिल॥ मांस
विकारस्यो त्वद्ध्या देश्या वर्जिता पत्तिः॥ अत्र ब्रूमः॥ दधिर्न्यां निर्दृष्ट वत्स गोपयः परिवर्जयेदिति॥ तेनेष्वरात्तद्ध्या
दीनां ग्रहणम्यात्मत्सं॥ वचनेन निषिद्धे वेधः॥ क्षीराणि यान्यन्नाणि तद्विकारं न ने बुधः॥ सप्तरात्रं व्रतं कुर्यात्प्रय
त्नेन समाहितः॥ औदुम्बरे कदाफत्स्त्रैणामित्यर्जनेनो क्रास्पग्रहणात्॥ तस्माद्विकारस्यापालं ज्ञापसंवर्जमिति॥ भाद्र
पदशुक्लचतुर्दश्यामनंतव्रतं॥ तत्र मुहूर्तपियास्नाने तव्रलेतिविधिः॥ पूजाव्रतेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति
मध्याह्नदेला यांया खेतिदिवोदासः॥ तथा भाद्रपदस्यांते चतुर्दश्यां द्विजोत्तम॥ पौर्णमास्यां समायोगे व्रतं चानंत
कारमेत्॥ इत्यनंतचतुर्दशी॥ भाद्रपदपौर्णमास्यां द्वादशीव्यापित्र गणान्तु द्विस्पृक्षा द्वं कर्तव्यं॥ पौर्णमासी पुस्तमी

तिथि॰ १०

सुसर्वास्तु निर्विघ्नं पिंडपातनं ॥ वर्ज्यं पितृप्रोष्ठपदीयं यावद्दर्शसमीपे वसेत् ॥ पिंडान्न दद्यात् ॥ इति भाद्रपदमासः ॥ कन्यागते
सवितरि ॥ कन्यासंक्रमे पराः षोडश घटिकाः पुण्यकालः ॥ शेषं प्राग्वत् ॥ अपरमहालयः ॥ कन्यागते सवितरि दिना
नि दर्शं पंचदश ॥ पार्वणेनेह विधिना श्राद्धं तत्र विधीयते ॥ कालादर्शे च ॥ पक्षाद्यदि च दर्शांतिमं पंचम्यादि दिनानि च ॥ अष्टम्यादि
यथाशक्ति कुर्यात् परपक्षिकं ॥ एकस्मिन्नपि दिने श्राद्धमुक्तं हेमाद्रौ ॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे ॥ यो वै
श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे ॥ तस्य संवत्सरं यावत्तृप्ताः पितरो ध्रुवमिति ॥ विधवा सुस्तु स्मृतिसंग्रहे ॥ चत्वा
रः पार्वणाः प्रोक्ताः विधवायाः सहैव हि ॥ ततः मातामहानां श्वश्रूणां मातामह्यास्तथैव च ॥ अत्र कौस्तुभकृतिरन्यावर्
ल्यं चत्वारः प्रोक्ताः ॥ स्वयं वा जन्मदारा वा ॥ पृथ्वीचंद्रोदये प्रयोगपारिजाते वसिष्ठः ॥ नंदायां भार्गवदिने चतु
र्दश्यां त्रिजन्मसु ॥ प्राजापत्ये च पौष्णे च पित्र्यर्क्षे भार्गवे तथा ॥ एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात् ॥ नंदाः प्रतिप
त्षष्ठी एकादश्यः ॥ त्रिजन्मसु ॥ जन्मनक्षत्रं ॥ तत्पूर्वोत्तरे वा त्रिजन्मानि ॥ रोहिणी रेवती मघाः भार्गवः शुक्रः एषु धनवान्कु राम १०
र्यादित्यर्थः ॥ केचित्तु ॥ नंदायां कामनेत्यग्निपितृकाम्ये ॥ गंडे च धृतिपाते च पिंडाः स्युर्जाः सुतेभ्युभिः इति ॥ अथवा स
प्तमी ॥ कामः त्रयोदशी ॥ अरो भौमः ॥ शुक्रः शुक्रः ॥ अग्निः कृत्तिका ॥ कालं भं भरणी ॥ अत्र पिंडाः स्युर्जाः सूत्यां कः ॥ एत
च सकृन्महालयविषयं ॥ सकृन्महालयकाम्ये पुनः श्राद्धे स्विले पुत्र ॥ अतीतविषये चैव सर्वमेतद्विचिंतयेत् ॥ अमापा

तगामा श्राद्धमाहूड्वेत् ॥ नभस्यपरपक्षस्य द्वितीया यदि या मघा ॥ तृतीया चाग्नितारानिः सहिता प्रीतिदा पितुः ॥ एतत्पक्षे षष्ठी यो
गविशेषेण कपिलासंज्ञा ॥ तदुक्तं वाराहे ॥ नभस्यकृष्णपक्षे तु रोहिणी पातभूसुतैः ॥ युक्ता षष्ठी पुराणैः कपिला परिकीर्तिता ॥
व्रतोपवासनियमैर्भास्करं तत्र पूजयेत् ॥ पुराणसमुच्चये ॥ भाद्रे मासेऽसितेपक्षे ज्ञानोद्वेबकरेस्थिते ॥ पाते कुजे च रोहि
ण्यां सा षष्ठी कपिला स्मृता ॥ हस्ता कैसु फलाति व्याप्यर्थः ॥ इयमेव चंद्रषष्ठी चंद्रोदयव्यापिनी ग्राह्या ॥ उक्तं च तत्रैव तथासेपूर्वो
त्तविष्णी ॥ तद्भाद्रपदे मासि कृष्णपक्षे सितेतरे ॥ चंद्रषष्ठीव्रतं कुर्यात्पूर्वविद्धं प्रशस्यते ॥ चंद्रोदये यदा षष्ठी पूर्वाह्ने चापरेह
नि ॥ चंद्रषष्ठ्युपासिते पक्षे सेवोच्चो प्रयत्नत इति ॥ कल्पतरौ ॥ भाद्रपदकृष्णाष्टम्यां महालक्ष्मीव्रतं ॥ सा चंद्रोदयव्यापिनी ग्राह्या
परदिने चंद्रोदयाद्ध्वं त्रिमुहूर्तव्यापित्वे परैव कार्या ॥ अन्यथा पूर्वैव ॥ पूर्वा का परस्य कालाष्टम्या चंद्रोदये सदा ॥ त्रिमुहू
र्तापिता पूज्या परतश्चार्धगामिनी ॥ तिमद्दनरत्ने निर्णयामृते ॥ अर्धरात्रमतिक्रम्य वर्तते योऽसरातिथिः ॥ तदा तस्यां तिथि
थौ कार्यं महालक्ष्मीव्रतं सदेति ॥ अथ नवम्यां मष्टकाश्राद्धं ॥ तत्र कात्यायनः ॥ अन्वष्टकासु नवभिः पिंडैः श्राद्धमुदाहृतं ॥
पित्रादि मातृमध्यं च ततो मातामहांतकं ॥ अन्वष्टकं गयायां चैव सत्यायन्यवृत्तेऽहनि ॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जी
वति ॥ सर्वासामेव मातृणां श्राद्धं कन्यागते रवौ ॥ नवम्यां हि प्रदातव्यं ब्रह्मलोकं स गच्छति ॥ इति सुते नावर्त्म कौस्तुभे ॥
अत्र सर्वासामित्युक्तेः सपत्नमातरि जीवंत्यामपि सपत्नमातृभ्यो दद्यात् ॥ तन्मरणे सति तस्यै तद्दद्यादित्युक्तं ॥ एके र

ब्राह्मणे एकपिंडं च श्राद्धं॥ इदं श्वानूपनीतेनापि कार्यं॥ तथाग्निपुराणे॥ अन्वष्टकासु वृद्धौ च गयायां च क्षयेहनि॥ अत्र मातुः पृथक्
कुर्याच्छ्राद्धं अन्यत्र पतिना सह॥ देशाचारव्यवस्था॥ इदं जीवत्पितृकेणापि सपिंडकं कार्यमिति हेमाद्रिः॥ मातुः श्राद्धे तु संप्राप्ते ब्राह्मणैः
सह भोजनं॥ सुवासिन्यैः प्रदातव्यमिति शातातपोऽब्रवीत्॥ सन्न्यासिनोप्याब्दिकादि पुत्रः कुर्याद्यथाविधि॥ महालये तु यच्छ्राद्धं
द्वादश्यां पार्वणेन तदिति॥ अथ मघात्रयोदश्यां श्राद्धं॥ श्राद्धं प्राप्य तु कर्तव्यं आषाढ्याः पंचमे पक्षे त्रयोदशी गजच्छाया॥ प्रौष्ठप-
प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीं॥ प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन च॥ इदं नित्यं॥ विजनत्वा विभक्ता वा कुर्युः श्राद्धं पृ-
थक् सुताः॥ मघासु च तथान्यत्र नाधिकारः पृथक् विनेति॥ हेमाद्रौ स्मृतिमातु मघायुक्ता त्रयोदशी॥ तिथिर्वैवस्वती नाम सा
छाया कुंजरस्य तु॥ एतस्मिं उरहितं कार्यं॥ मघासु कृत्रयोदश्यां पिंडनिर्वपणं द्विजः॥ सत्संतानो नैव कुर्यान्निक्षिपेतेन वंशो विदुः॥
इति पृथ्वीचंद्रोदये॥ इदं मलमासेपि कार्यं॥ तत्र त्रयोदश्यां श्राद्धं न कुर्यादिति॥ वचनानि तु पुत्रवद्विषयाणि॥ असंतानस्तु
यत्तस्य श्राद्धमोक्ता त्रयोदशी॥ संतानयुक्तो यः कुर्यात्तस्य वंशक्षयो ध्रुवमिति॥ हेमाद्रौ नागरखंडोक्तेः॥ अत्र मघात्रयो- राम.
दशी महालयरूपा जादीनां तंत्रेण प्रयोगः॥ अथ चतुर्दशी॥ वृक्षारोहणलोहाद्यैर्विद्युज्ज्वालाविषाग्निभिः॥ श्राद्धं तेषां प्रक- १२
र्तव्यं चतुर्दश्यां नराधिप॥ यत्तु शस्त्रकृतपतनं ज्ञातानां शीघ्रविपन्नानां संन्यासे वा गृहेपि वा॥ श्राद्धं कुर्वीत ते तेषां चैव
र्जयित्वा चतुर्दशीं॥ प्रेतपक्षे चतुर्दश्यां एकोद्दिष्टविधानतः॥ देवपूर्वं तु यच्छ्राद्धं पितॄणां मध्यमं भवेत्॥ महालयप्र-

तेऽपरपक्षेऽष्टादश्यां पक्षमध्यगे॥ तथा तिथिं च नक्षत्रं वारं च न विचारयेत्॥ निर्णयदीपिकायां तु॥ पितृमृताहे निषिद्धं तु दि-
नेपि सकृन्महालयः कार्य इत्युक्तं॥ आषाढ्याः पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ मृताहनि पितुर्यो वै श्राद्धं दास्यति मा-
नवः॥ तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवमिति॥ नागरखंडोक्तेः॥ या तिथिर्यस्य मासस्य मृताहे तु प्रवर्तते॥ सा
तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः॥ तिथिच्छेदो न कर्तव्यो विना शौचं यदृच्छया॥ चतुर्दशीं वर्जयित्वेति याज्ञवल्क्यः॥
इति पंचम्यादिपक्षविषयं॥ पूर्वोक्तनंदादिनिषेधस्तु॥ मृताहातिक्रमे पौर्णमास्यादिमृतश्राद्धे च ज्ञेयः॥ यत्तु स्मृत्यर्थ-
सारे॥ विवाहव्रतचूडासु वर्षमर्धं तदर्धकं॥ पिंडदानं मृदा स्नानं न कुर्यात्तिलतर्पणमिति॥ तस्यापवादो दिवोदासीये बृह-
स्पतिः॥ तिथिसंवत्सरे प्रेते पितृयागे महालये॥ पिंडदानं प्रकुर्वीत तस्मुगादिभरणी मघे॥ महालये गयाश्राद्धे मातापि-
त्रोः क्षयेहनि॥ कृतोद्वाहोपि कुर्वीत पिंडनिर्वपणं सदेति॥ सन्न्यासिनां तु द्वादश्यां श्राद्धं कार्यं॥ हंसे कन्यासु वर्षा-
स्वेगाकेनापि गृहे वसतः॥ पंचम्योरंतरे द्वाभ्यामुभयोरपि पक्षयोः॥ यतीनां च वनस्थानां वैष्णवानां विशेषतः॥ द्वादश्यां वि-
हितं श्राद्धं कृष्णपक्षे विशेषत इति॥ प्रतिबंधके सति॥ यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः॥ शून्यं प्रेतपुरं यावत् वृश्चि-
कं नावदागतः॥ वृश्चिके समतिक्रांते पितरो दैवतैः सह॥ निश्वस्य प्रतिगच्छंति शापं दत्वा सुदारुणं॥ इदं च श्राद्धमन्नेनैव का-
र्यं न आमान्नादिना॥ मृताहं च सपिंडं च गयाश्राद्धं महालयं॥ आपन्नोपि न कुर्वीत श्राद्धमामेन कर्हिचिदिति स्मृतिदर्पणोक्तेः॥

तिथिनि॰ ११ अत्र देवलः ॥ तातांबात्रितयं सम्यक् जननी मातामहादित्रयं सत्स्त्रीस्त्री तनयादि तातजननीस्वभ्रातरस्तस्त्रियः ॥ ताताम्बात्मज
गिन्यपत्यधवस्नुषा जायापितामहीगुरुः शिष्याप्तापितरो महालयविधौ तीर्थे तथा तर्पणे ॥ इति ॥ अनेका मातरो मध्ये स्वस्त्राद्यश्चाप
रपक्षके ॥ अर्घ्यदानं पृथक् कुर्यात् पिंडमेकं तु निर्वपेत् ॥ इति ॥ जीवन्मातृकस्तु सापत्नमातुरेकोद्दिष्टं कुर्यान्न पार्वणं ॥ द्वार
लोपात् ॥ स्वस्त्रीति मातामहानां सपत्नीकत्वेपि विभक्ते स्वतीमातामहादीनामपि पृथक् कुर्यात् ॥ अत्राकाको तु ॥ एकस्मिन्ब्राह्म
णे सर्वाभ्यो चार्घ्यादींस्तु प्रपूजयेत् ॥ उपाध्यायगुर्वादीनामेकोद्दिष्टविधानेन महालये पूजनीयाः प्रयत्नतः इति ॥ इतरेषां पि
त्रादीनां पार्वणमयीसिद्धं ॥ अत्र धुरिलोचनसंज्ञिकौ विश्वेदेवौ ॥ एतच्चान्यस्य पित्रादीनां जीवत्पितृकेणापि कार्यं ॥ वृद्धो नो
र्थे च मन्यस्ति तातेऽन्यपि तिते सति ॥ एष एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति कात्यायनोक्तेः ॥ यत्तु कौंडिन्यः ॥ दर्शश्रा
द्धं गयाश्राद्धं श्राद्धं चापरपक्षिकं ॥ न जीवत्पितृकः कुर्यात्तिलैः स्तर्पणमेव चेति ॥ तत्स्वस्य स्वपित्राद्यतिरिक्तविषयं ॥ काम्यश्रा
द्धपरं वा ॥ एतच्च पिंडरहितं जीवत्पितृकेण कार्यं ॥ मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्यात् गुर्विणीप राम॰ ११
तिरेव च ॥ अन्वष्टक्यमाघवर्षिकादौ तु वचनान्तरवतीति वक्ष्यमाणः ॥ अत्र श्राद्धांगतर्पणं पक्षश्राद्धे प्रतिदिनं श्राद्धो
त्तरं ॥ सकृन्महालये तु परेद्युः कार्यं ॥ नारदः ॥ पक्षश्राद्धं यदा कुर्यात्तर्पणं तु दिने दिने ॥ सकृन्महालये चैव परेद्युरि
ति लोके कृमिति ॥ अत्र च भरणी श्राद्धं अतीव प्रशस्तं ॥ भरणी पितृपक्षे तु महती परिकीर्तिता ॥ अस्यां श्राद्धं कृतं येन

पिंडरहितं श्राद्धं पुंसः न तु स्त्रियः ~

वदिनांतरे पार्वणं मातामहादि सपर्यं कार्यमेव ॥ पितामहे पितृस्त्वदृहते षु पार्वणमेव कार्यं ॥ एकस्मिन्वा द्वयोर्वापि पितृ द्युक्ते स्त्रिणा वा
हते ॥ एकोद्दिष्टं सुतः कुर्यात्तत्र माणां दर्शपक्षे वेत् ॥ इति ॥ पुस्त्वे त्रैव शास्त्रादीना हतस्तस्य वार्षिकमेव पार्वणमेकोद्दिष्टं कार्यं ॥ नह व
श्राद्धद्वयं अत्र श्राद्धाकरणे अग्निपक्षे दिनांतरे वा न कार्यमिति तत्रैवोक्तं ॥ अमायां तु ॥ हंसे करस्थिते पातु अमावास्या करस्थि
ता ॥ मातेयकुंजरीछाया इति बौधायनो ब्रवीत् ॥ अजे न सर्वलोके तद्वर्षासु नियतव्रतः ॥ हस्तिछायासु विधिवत्कर्णं
व्यजनं वीजितं ॥ वनस्पतिगते सोमे या छाया प्राङ्मुखी भवेत् ॥ गजच्छाया तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत् ॥ इति
श्राद्धपक्षे कृत्स्नमहालयविधिर्नाम भाद्रपद मासः ॥ अथाश्विनमासः ॥ आश्विनशुक्लप्रतिपदि दौहित्रस्य मातामहश्रा
द्धमुक्तं ॥ हेमाद्रौ ॥ संग्रहे ॥ जातमात्रोपि दौहित्रो विद्यमानेपि मातुले ॥ कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते ॥ इति ॥ इदं सं
गवव्यापिन्यां ग्राह्यमिति निर्णयदीपिकोक्तं ॥ प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं ॥ श्राद्धं मातामहे कुर्यात्सपिंडं संगवे स
दा ॥ जातमात्रोपि दौहित्रो जीवत्यपि च मातुले ॥ प्रातः संगवयोर्मध्ये आमस्य प्रतिपद्भवेत् ॥ इदं च मलमासे न कार्यं ॥ स्प
ष्टमासविशेषाख्या विहितं वर्जयेन्मले ॥ इति निषेधात् ॥ इदं च जीवत्पितृकेणैव कार्यमिति शिष्टाः ॥ इदं च शिष्टाचारात्स
पिंडकं कार्यं केचित् ॥ पिंडरहितं तु युक्तं ॥ जीवत्पितृकस्य मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः ॥ न जीवत्पितृकः कुर्यात् गुर्विणी
पतिरेव चेति दक्षेण पिंडनिषेधात् ॥ अन्वष्टक्यं यद्वद्दौहित्र वन्नातं ॥ भावाश्वेति संक्षेपः ॥ आश्विनशुक्लप्रतिपदि नवरात्रा
रंभः ॥ आश्विनशुक्लप्रतिपदि नवरात्रप्रतिपत्परयुता ग्राह्या ॥ अमायुक्ता न ग्राह्या ॥ अत्राद्याः षोडश घटिकाः वर्जयेत् ॥

तिथिनि॰ १३ चित्रावैधृतियोगे तु आद्याः स्त्र्यंशा वर्ज्याः॥ यदा तु शुद्धाऽसति वृद्धौ तदा शुद्धेऽलाभे पूर्वैव परदिने प्रतिपदभावे तु अमायु
क्तैव ग्राह्या॥ शुद्धा तिथिस्तु कर्तव्या प्रतिपच्चोर्ध्वगामिनी॥ आद्यास्तु नाडिकास्त्यक्त्वा षोडश द्वादशापि वा॥ अपराह्ने तु कु
र्वीत मंत्री द्वंद्वं संततिकांक्षिभिः॥ अमायुक्ता न कर्तव्या प्रतिपत्पूजने मम॥ मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्विता॥ इति॥ पूर्व
विद्धा तु या शुक्ला भवेत्प्रतिपदाश्विनी॥ नवरात्रव्रतं तस्यां न कार्यं शुभमिच्छता॥ देशभंगो भवेत्तत्र दुर्भिक्षं चोपजायते॥
न दर्शे निकलायुक्ता प्रतिपच्चंडिकार्चने॥ उदये द्विमुहूर्तापि ग्राह्या सोदयगामिनी तिथिः॥ इति॥ गोविंदार्णवे देवीपुराणे उक्तं॥ ए
पुर्वचने मुक्तकलशस्थापनग्रहणात्तद्दिव प्रथमदिने निषिध्यते न तु एवासाद्दि शुद्धपक्षे दर्शविद्धत्वात् इमाधवोक्तेश्च॥ पूर्व
दिने शापस्य बाधेमानाज्ञानादित्ति केचित्॥ वस्तुतस्तु पूर्वकालेषु चंडिकार्चनग्रहणं त्र्यग्रहणादुपवासादेरंगत्वात्त
धानदैवी पूजादावपि कलशस्थापनग्रहणं तु पलक्षणं॥ अत एव देवलः॥ व्रतोपवासनियमे घटिकैकापि या भवेत्॥
सा तिथिस्तद्दिने पूज्या विपरीता तु पैतृके॥ यदा पूर्वदिने संपूर्णा शुद्धा च तुल्या परदिने तदा संपूर्णत्वाद्माधवोक्तेरावा
स्य पूर्वैव॥ यानि वृद्धितीयायोगनिषेधकानि वचनानि पठंति तान्यपि शुद्धाधिकनिषेधपराणि परदिने प्रतिपदोऽसत्ता राम॰ १३
सत्वे तु दर्शयुतापि पूर्वैव ग्राह्या॥ अष्टम्यां च नवम्यां च पूजा अष्टमीनवमीपूजैव प्रधानमन्यत्सर्वमंगमिति गौडाः॥ त्रिव
तमिति तस्य रात्राव कर्तव्य तेयंते॥ न तु शास्त्रे कर्मकालेन व्याप्तिनी ग्राह्यैव प्राप्नुयात्॥ तथा च वदन्नारायणमुक्तं॥ एवं चतुर्वेदवि
दो विप्रान्न सर्वान्संपूजयेत्॥ तेषां च वरणं कार्यं वेदपारायणाय वै इति॥ तथा॥ एकोत्तरा तु वृद्ध्या तु नवमी यावदेव हि॥

चंडीपाठं जपेच्छैव जापयेद्वा विधानतः॥ प्रणवं जाद्वितोजस्त्वा स्तोत्रं वा मंत्रं हिंतां पठेत्॥ अंते च प्रणवं दद्यादित्युवाचादिपूरु
षः॥ आधारे स्थापयित्वा तु पुस्तकं पूजयेत्सुधीः॥ स्वयं च लिखितं यच्च शूद्रेण लिखितं भवेत्॥ अब्राह्मणेन लिखितं तं
चापि विफलं भवेत्॥ ऋषिच्छंदादिकं यस्तु पठेत्स्तोत्रं विचक्षणः॥ इति॥ एवं नवमीपर्यंतं प्रत्यहं कुर्यात्॥ महादिदोषे वसे कुर्या
चंडिकापूजनादिकं॥ द्विगुणं तु द्वितीये स्यात् त्रिगुणं तत्परे स्मृतं॥ एवं नवमीपर्यंतं पूजाजपादिकं कुर्यात्॥ तिथिह्रासे तु द्वितीया
तिथिद्वयनिमित्तं पूजादिकं तद्वृद्धौ वा वृद्धि॥ पूर्वोक्तवचनैर्बाधात्॥ यत्पाद्मे देवोद्यः कर्मकाले त्वव्याप्तिनीमपि तां त्यक्त्वा परे व
रा नवमी प्रयुक्तं॥ यदा निशीथे सति ष्टमी सत्त्वकारिणी युक्ता परैवेति माधवेनोक्तं॥ तथात्रापि॥ तिथिवृद्धौ तु ति
थिह्रासे न नवरात्रमपार्थकं॥ अष्टरात्रे न दोषोयं नवरात्रे तिथिक्षये॥ नवरात्र शब्दः क्वचित्त्रक्षणया कर्मवाचीति पातु वैधृतित्याद्यपि
रिहारेण प्रतिपन्न लभ्यते तदैव॥ प्रतिपद्याश्विने मासि भवेत् वैधृतिचित्रयोः॥ आद्यपादौ परित्याज्य प्रारंभेन्नवरात्रकं॥ विश्वरूपप
निबंधे॥ अमायुक्ता न कर्तव्या कर्तव्या संयुतेति वाक्यात्॥ द्वितीयदिने प्रतिपन्मुहूर्तं द्वयं चित्रावैधृतिश्च यामत्रयं यदि चेत्तदा प्रति
पद्येव कलशस्थापनं नामायुक्तायां॥ नात्र येद्वकुलं यत इति॥ दोषश्रवणात्॥ प्रतिपत्स्वल्पमप्यापि यदि न स्यात्परेहनि॥ अमायु
क्ता तदा कार्या त्यक्त्वा षोडश नाडिकाः॥ कुतुल्यापि च सति पद्धतिवैधृतिश्वापि वा यदि॥ आद्या प्रतिपदस्त्याज्याः घटिकाः को
ऽप्यौ वदत्॥ कलशस्थापनं कुर्यात्प्रतिपद्येव वै दिवा॥ न रात्रौ स्थापनं कुर्यान्न च कुर्याद्विसर्जनं॥ भास्करोदयमारभ्य वृद्धदश
नाडिका भा प्रातःकालः इति श्रीकृष्णाः स्थापनादौ हरणादिषु॥ इदं च देवीपूजनं कृत्वा स्त्रीदाप्यपि कार्यं॥ नक्तमेतु केतप्राजीवेसिंह

तिथिनि· स्थे च बृहस्पतौ ॥ कार्या वस्त्वदे वा स्मार्त्तप्रत्यहं कुलधर्मवत् ॥ इति ॥ मलमासे तु वर्त्तमानावा न्तमवति ॥ अश्वयुजनवमु
१४ क्तां मदनरत्ने देवीपुराणे ॥ अश्वयुक् शुक्ल प्रतिपत्स्वाती योगे शुभेदिने ॥ पूर्वं मुहूर्त्ते सवा ना न मध्यमां श्रियमाद्वात् ॥ आश्विर
ने शुक्लपक्षे तु प्रारब्धे नवरात्रके ॥ दशावाशौचे समुत्पन्ने क्रियाः कार्याः कथं बुधैः ॥ सूतके वर्त्तमाने च तत्रोत्पन्ने सदा बुधैः ॥ तत्र
न दुरात्रे वर्त्तमाने सूतकं यदो समन्ते नवेदिसनयः ॥ देवीरजा प्रकर्त्तव्या पशुघातविधानतः ॥ सूतके पूजनं प्रोक्तं दानं चैव विशेषतः ॥
देव्यां मुद्दिश्य कर्त्तव्यं तत्र दोषो न विद्यते ॥ इति वचनात् दाक्षायणीशाक्करणीयमिति दिष्ट्या पारणं स्वत्या ले स्त्रिया उपवासः स्व
यं पूजनमन्यद्वारा कारयेत् ॥ सूतकादिवदिक्षेषवचनात्मा वात् ॥ सूरिजन्मा ॥ गंधालेकारतांबूलपुष्पमालानुलेपनं ॥ उपवा
से न दुष्यंति दंतधावनमज्जनं ॥ इदं नवरात्रेसु भक्तको पवासविषयत्वेन ॥ आश्विनं शुक्लपंचम्यां उपांगललिता व्रतं ॥ तत्रप
द्यपिकथायां कालविशेषो नोक्तस्तथापि रात्रौ जागरणं कुर्यादिति ॥ तत्र किंपूजा रात्रौ प्रासस्ता चतत्र व्यापिनी ग्राह्येति किंचित् ॥ सूरि
जन्मा ॥ वस्तुतस्तु वचनं विना रात्रिपूजा योमानाभावाज्जागरणस्य च योगस्य ता पूर्वाक्त व्यादिना ग्राह्येति हेमाद्रिः ॥ मतेसाधु राम·
प्रतिभाः ॥ तुल्का जागरणे नक्ते चंद्रोदय पर्वे स्त्री चैव व्रते तथा ॥ तारावृते कुसते बंधुरान्नियोगो विधिव्यते ॥ इति ॥ आश्विनशुक्ल १४
पक्षे मूलनक्षत्रे सरस्वतीस्थापनं ॥ मूले तु स्थापने देव्याः पूर्वाषाढासु पूजनं ॥ उत्तरासु बलिं दद्या छ्रवणे न विसर्जयेत्
पुस्तके स्थापिते देवी विद्याकामो द्विजोत्तमः ॥ नाध्यामपन्न च लिखेन्नाध्यापीत कदाचनेति ॥ पुष्पया बिल्वपुष्पपत्रि
कापूजा वसतस्मंतापूर्वाह्णे एवं कार्या मूलानुराधाव न्नधा फलदाविति ॥ रंभा कथा हरिद्रा च जयंती बिल्वदाडिमौ ॥

अशोक नाम वृक्षाश्च धान्यादि नवपत्रिका ॥ प्रतिपदादि नवतिथिषु उपवासादिकरणासमर्थानां ते त्रयामाद्दि दिनत्रये कार्यं
त्रिरात्रं वापि कर्त्तव्यं सप्तम्यादि यथाक्रममिति ॥ अत्रोक्तेन एकभक्तेन अयाचितेन उपोषितेन वा ॥ अत्रतिथिपो ग पद्यं त्रेणो
पवासः ॥ अथ महाष्टमी सा च परयुताग्राह्या ॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे चतुर्दशी ॥ पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयु
ता ॥ अष्टमी नवमीयुक्ता कर्त्तव्या फलसंततीच्छदेत् ॥ न कुर्यान्नवमी तत्र दशमीविद्धा कदाचनेति ॥ स्मरन्महाष्टमी पूज्या नवमी सं
युता सदा ॥ सप्तमी संयुता नित्यं शोकसंतापकारिणी ॥ सप्तमी स्वल्पसंविद्धा वर्जनीया सदा ष्टमी ॥ निर्णयामृते दुर्गोत्सवे ॥
मूलमात्रेण संयुक्ता सदा त्याज्याष्टमी बुधैः ॥ क्लेशमात्रे ण सप्तम्या यदि स्याद्यादि दुष्टिते ॥ द्वितीय तु ॥ सप्तम्या मुदिते सूर्ये
परितोयाष्टमी भवेत् ॥ तत्र दुर्गोत्सवं कुर्यान्न कुर्याद्दपरे दिनेति ॥ विश्वरूपनिबंधे वचनं ॥ आश्विनकृष्णाष्टमीवि
षयं ॥ महाष्टम्यामाश्विने मासि शुक्ले कल्याणकारिणी ॥ सप्तम्या विद्धा कार्या मूले न तु विशेषतः ॥ इति ॥ तानि तु परदिने
ष्टम्याभावविषयाणि मदनरत्ने ॥ उपवासं महाष्टम्यां पुत्रवान्न समाचरेत् ॥ आश्विनस्य शुक्ले नवमी सा तु पूर्वयुता महानवमी
ग्राह्या ॥ यदि सायं त्रिमुहूर्त्ता वेधवती अन्यथा नुपरा ॥ श्रावणी दुर्गानवमी दूर्वा चैव हुताशनी ॥ पूर्वविद्धा तु कर्त्तव्या
शिवरात्रिर्बलेर्दिनमिति ॥ हेमाद्रिः ॥ वेधश्च त्रिमुहूर्त्तत्रयेणैव ज्ञेयः ॥ यत्तु पि हेमाद्रिमते मुहूर्त्तं च याम्लको वेधो
स्ति इति ॥ तथा सूर्योदयेरावसः ॥ त्रिमुहूर्त्ता पूर्वा न नवमी ॥ न कुर्यान्नवमी ताद्दक्कू दशम्यां तु कदाचनेति

स्कांदे पराह्निविधाश्च॥ त्रिमुहूर्तयोगाभावे तु निषिद्धापि परैव कार्येति निष्कृष्टार्थः॥ तत्राश्विनशुक्ला नवमी मुहूर्त्तं
वा कलायदि॥ सा तिथिः सकला ज्ञेया लक्ष्मीविद्यार्थिभिरिति॥ मदनरत्ने विशेषः॥ सौरपुराणात्॥ सूर्योदये परिकला
पूर्णा स्यात्पराह्नि॥ बलिदानप्रकर्त्तव्यं तत्र देवाः शुभावह॥ बलिदाने कृते इष्ट्यां पुत्रशोको भवेन्न वै नृपेति देवीपुराणात्
बल्यादौ परा कार्येति उपवासादौ च पूर्वेति मदनरत्ने उक्तः॥ निर्णयदीपे तु महानवमी परदिने पराह्णव्यापिनी चेत्सा राहौ
कार्या॥ अन्यथा पूर्वा॥ अस्य तु शारदनवमीविषयत्वं समूलत्वं च विमृश्यम्॥ नवम्यां बलिदानं च अपराह्णे च प्रशस्यते॥ द
शमी वर्जयेत्तत्र नात्र कार्या विचारणेति॥ स्कन्दाधिकनिषेधपराणीति मदनरत्ने॥ केचित्तु नवम्यां होमं कुर्वन्ति॥ अपरे नवरा
त्रपारणात् दशम्यां होमं कुर्वन्ति॥ ...यं तत्र कार्या॥ प्रतिपदादिक्रमेणैव यथा वज्र नवमी भवेत्॥ नवमीपर्यन्ते प्रधान पूजा सुके
स्य वा सादेन्मांगत्वेन तत्सर्यं तं त्वाद् माद्वैधौम्यवचनं॥ तिथिक्षासेपि नवमी तिथिना कुर्यात्पारणं व्रतलक्षणे तेः
॥ दशम्यां पारिता देवी कुलनाशं करोति वै॥ तस्मात्तु पारणं कुर्यान्नवम्यादि वु धाधिपेति समूलं चेत्तदा लोहाभिसारिक
विषमाणि॥ यानि तु केश्चिल्लिखितानि नवम्यां पारणं कुर्वेद्धिधाय कालिनानि हेमाद्यादि विरुद्धत्वान्निर्मूलानि॥ समूल
त्वेपि यदा दिनद्वये नवमी तदा द्वितीयदिने उपोष्यापि तथ्यं ते पारणं न किं तु नवमी मध्ये कार्यं॥ केचित्तु पारणाहे सूतको
दि प्राप्ते तदतिक्रम्य पारणं कुर्यादित्याहुः॥ तन्नेदं॥ काम्योपवासे प्रक्रांते त्वंतरा मृतसूतके॥ तत्र काम्यव्रतं कुर्याद्दाना

र्चा न विवर्जयेत्॥ इति माधवीये॥ कौर्म्ये॥ प्रारंभो वरणं यज्ञः संकल्पो व्रतसत्रयोः॥ नांदीमुखं विवाहादौ श्राद्धे पाकपरिक्रि
... क्रियेति॥ रुद्रयामलेपि॥ सूतके पारणं कुर्यान्नवम्यां होमपूर्वकं॥ तदंते भोजयेद्विप्रान् दानं दद्याच्च शक्तितः इति॥ तदंते
सूतके वा भूपेजनार्दनं॥ स्त्रीणिरपि रजोदर्शनमध्ये कर्त्तव्यमेव पारणं॥ यत्तु नियमस्था यदा नारी प्रपश्येद्रजः॥ उ
पोष्ये व तु नाराणः स्ना त्वा शेषं चरेद्व्रतमिस्व गिरौव वृना तस्म मेहद्धि पारणं कुर्यादिति सर्वगा दशम्यां देवीविसर्जयेत्॥ तथा॥ ततः
प्रातः समुत्थाय दशम्यां विधिपूर्वकं॥ संप्रेषणं तु कर्त्तव्यं गीतवाद्यैर्मनिःस्वनैः॥ रूपं देहि यशो देहि भाग्यं मातर्भगवति देहि मे
पुत्रान्देहि धनं देहि सर्वान्कामांश्च देहि मे॥ इति संप्रार्थ्य देवीं तु ततउत्थापयेत्सुधः॥ उत्तिष्ठ देवि चंडेशि शुभां पूजां प्रगृह्य च
कुरुष्व मम क... ...स्याण महाभिः शक्तिभिः सह॥ गच्छ गच्छ परं स्थानं स्वस्थानं देवि चंडिके॥ व्रज स्रोतोजलं वृद्ध्यै स्थी
यतां च जले त्विह॥ उत्थापयेज्जलेनीत्वा॥ दुर्गे देवि जग... ...न्मा तः स्वस्थानं गच्छ पूजिते॥ संवत्सरे व्यतीते तु पुनरागमनाय च॥ इमां पू... ...जां मया देवि यथाशक्त्योपपादितां॥ रक्षार्थं त्वं समादाय व्रज ... स्थानमुत्तमं॥ इति तत्र...

प्रवाहयेत्॥ इयमेव ... ...विजयादशमी साच क्षितीचंद्रे दिने श्रवणयोगाभावे पूर्वा ग्राह्या॥ नवमी वोधयुक्ता स्यां
दशम्याम् अपराजिता॥ ददाति विजयं देवी पूजिता जयवर्द्धिनी॥ इति हेमाद्रौ॥ अत्र यंत्र निर्णीतोर्थः॥ अपराह्णमुख्य
कर्मकालः॥ तत्रैव पूजा द्युक्तेः॥ प्रदोषो गौणः॥ तत्र दिनद्वये अपराह्णे कालेऽपराह्णे प्रदोषव्याप्ते राधिक्यात्॥ दिनद्वये प्रदो

षष्ठ्यापि स्यादपराह्णव्यापित्वाधिक्यात्॥ श्रवणास्तु रोहिणीवदप्रयोजकः॥ दिनद्वये अपराह्णस्पर्शे तु पूर्वा॥ तत्रापि परदिने
अपराह्णे श्रवणासत्त्वे परैवेति दिक्॥ अत्र विशेषः॥ शमीमुल्लंघ्य गत्वा यत्र स्थानमभयंकरं॥ अर्चयित्वा शमीवृक्षम
र्च्चयेत्तत्र ततः पुनः॥ शमीमंत्रस्तु॥ अमंगलानां शमनीं शमनीं दुष्कृतस्य च॥ दुःस्वप्ननाशिनीं धन्यां प्रपद्येऽहं शमीं शुभां॥
शमी शमयते पापं शमी लोहितकंटकी॥ धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी॥ करिष्य
माणयात्रायां यथाकालं सुखं मया॥ तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते॥ गृहीत्वा साक्षतामार्द्रां शमीमूलगतां मृदं
॥ गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति॥ अत्रैव बलिराजनमुक्तं॥ कृत्वा नीराजनं राजा बलवृद्ध्यै यथाक्रमं॥ शोभ
नं स्वजनेष्वेषु जलगोमातृसंनिधौ॥ इति॥ आश्विनपौर्णमासी परा ग्राह्या॥ सावित्रीमंतरेणान्यव्रतामापौर्णमास्याप
रेति दीपिकोक्तेः॥ अत्र विशेषस्तिथितत्त्वे लैंगे॥ आश्विने पौर्णमास्यां तु चरेज्जागरणं निशि॥ कौमुदी सा समाख्या
ता कार्या लोकविभूतये॥ कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावतस्थितं॥ सुगंधिर्निशि सद्वेषोऽक्षैर्जागरणं चरेत्॥ अ
त्रैवाश्वयुजीकर्मोक्तमाश्वलायनेन॥ तथा॥ निशीथे वरदा लक्ष्मीः को जागर्तीति भाषिणी॥ तस्मै वित्तं प्रयच्छामि अ
क्षैः क्रीडां करोति यः॥ इति॥ पूर्वाह्णव्यापिनी ग्राह्येति देवकमतात्॥ आग्रयणं तु पर्वणि कार्यं॥ शारदाग्रयणं तु पर्वणि
नाम पर्वणि स्यात्तदुच्यते॥ इति शौनकोक्तेः॥ तत्रापि विशेषः पर्वणि कार्यमिति॥ तच्च दर्शपूर्णमासयोरेकैककर्मत्वेनैक

त्वमनियमात्॥ दर्शेष्ट्याः परं पौर्णमासेष्ट्याः प्राग्भवतीति हेमाद्र्युक्तेः॥ तच्चाग्रयणं त्रेधा॥ व्रीह्याग्रयणं यवाग्रयणं श्यामाकाग्रयणं चेति॥ ए
तेषां कालः श्रुतावुक्तः॥ शरदि व्रीहियवाभ्यां शरद्वसंतयोर्यजेत श्यामाकैर्नीवारैर्वा वर्षास्वपि कालेनान्येन पुराणैर्वेति॥ तत्रापि
श्यामाकाग्रयणमनित्यमितरैस्तु॥ अनाहिताग्नेर्यस्तु यवाग्रयणं कार्यमिति स्मार्त्तहेमाद्रौ नुक्तत्वात्॥ आहिताग्नेस्तु यवाग्रयणस्या
प्यनित्यत्वं॥ यदा त्वेतदाश्विनपौर्णमास्यां क्रियते॥ तदैवकालत्वादाश्वयुजीयकर्मणोऽप्यत्र समानतंत्रता भवति मलमासे न कार्यं
अन्यथा नेति प्रागुक्तं॥ इत्याश्विनः॥ अथ कार्त्तिकमासः॥ तुलासंक्रमे प्रागपरा दशघटिकाः पुण्यकालः॥ रात्रौ निशीथात्प्रा
क्परतश्च संक्रमे पूर्वोत्तरदिनार्धे पुण्यं॥ निशीथे तु दिनद्वये पुण्यमिति प्रागुक्तं॥ अथ कार्त्तिकस्नानं॥ इषशुक्लैकादश्यां पौर्णमास्यां
वा आरभ्य कार्त्तिकद्वादश्यां पौर्णमास्यां वा समाप्तिः॥ शतसमास्तपस्तप्त्वा कृते यत्प्राप्यते फलं॥ तत्कार्त्तिके पंचनदे सकृत्स्नानेन लभ
भ्यते॥ तुलामकरमेषेषु प्रातःस्नानं विधीयते॥ हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति सौरमासे उक्तं॥ कार्त्तिके द्विदलव्रतं
प्रागुक्तं कार्त्तिके द्विदलं त्यजेत्॥ नूतनान्यपि जीर्णानि सर्वाण्येव विसर्जयेत्॥ कार्त्तिके आकाशदीपो निर्णयामृते उक्तः॥ तुलायां
तिलतैलेन सायंकाले समागते॥ आकाशदीपं यो दद्यात् मासमेकं हरिं प्रति॥ महतीं श्रियमाप्नोति रूपसौभाग्यसंपदमिति॥ दा
मोदराय नभसि तुलायां लोलया सह॥ प्रदीपं ते प्रयच्छामि नमोऽनंताय वेधसे॥ इति॥ कार्त्तिककृष्णचतुर्थी करकचतुर्थी सा चंद्रोद
यव्यापिनी ग्राह्या॥ कार्त्तिककृष्णैकादशी गोवत्ससंज्ञा॥ सा प्रदोषव्यापिनी ग्राह्या॥ दिनद्वये तत्त्वे पूर्वयुग्मवाक्यात्॥ व
त्सपूजा वटश्चैव कर्त्तव्या प्रथमेऽहनि॥ इति निर्णयामृते॥ सवत्सां तुल्यवर्णां च नालिनीं गां पयस्विनीं॥ चंदनादिभिर

लभ्य पुष्पमालाभिरर्चयेत्॥ आश्विने कृष्णपक्षे तु द्वादश्यादिषु पंचमी॥ तिथिषूक्तो पूर्वरात्रे नृणां नीराजने विधिना नीराजयेत्तु गृह
वींस्तु विप्राश्वांस्तु तुरंगमान्॥ ज्येष्ठाः श्रेष्ठा जघन्यांश्च मातृमुख्यांश्च योषित इति॥ कार्त्तिकस्यासितपक्षे त्रयोदश्यां निशामुखे॥
यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति॥ सूर्यजप्रीत्यर्थं आश्विनकृष्णचतुर्दशी चंद्रोदयव्यापिनी ग्राह्या॥ दिनद्वये तथात्वे पूर्व
दिनेऽभ्यंगः॥ दिनद्वयेप्यसत्वे त्रयोदश्यामभ्यंगः॥ आश्विनयुक् कृष्णपक्षस्य चतुर्दश्यां विधूदये॥ कर्तव्यं तिलतैलेन स्ना
नं नरकभीरुभिः॥ दिनद्वयेपि चंद्रोदये चतुर्दश्यां सत्वे पूर्वदिने अभ्यंगं कुर्यात्॥ पूर्वविद्धा चतुर्दश्या कार्त्तिकस्य सितेतरे॥ प
क्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः॥ इति॥ निर्णयामृते॥ इदं तु परदिने चतुर्दश्यभाव विषयं॥ अतः द्वितीयेह्नि अरुणोदये च
तुर्दशी सत्वे परदिने एवाभ्यंगं कुर्यात्॥ इति हेमाद्रिः॥ तथा कृष्णचतुर्दश्यामाश्विनेर्कोदये सुराः॥ यामिन्याः पश्चिमे यामे तैलाभ्यं
गो विशिष्यते॥ यदपि चंद्रप्रकाशे॥ त्रयोदशी यदा प्रातः क्षयं याति चतुर्दशी॥ रात्रिशेषे तु मावास्या तदाऽभ्यंगस्त्रयोदशीति तद्धेमा
द्रिनिर्णयामृतादावलिखितत्वेनानतिमूलं॥ समूलत्वेपि नरकचतुर्दश्याः सूर्योदयद्वयासंबंधित्वपक्षयोत्र विवक्षितः॥ किं
तु अभ्यंगकालात्राकसमाप्तिरूपोत्र ह्रासः क्षयशब्देन विवक्षितः॥ तदा चतुर्थयाममात्रे स्नानमुक्तं॥ गयादव्यासनिबंधेना राम॰ १८
रदोपि॥ इषासितचतुर्दश्यामिंदुक्षयतिथावपि॥ ऊर्जादौ स्वातिसंयुक्ते तदा दीपावलीभवेत्॥ कुर्यात्संलग्नमेतच्च दीपोत्स
वदिनत्रयं॥ ये तु त्रयोदश्यां मध्ये स्नानमाहुस्तेषामाशापन्न विदुः॥ अरुणोदयतोन्यत्र रिक्तायां स्नाति यो नरः॥ तस्याब्दि
कभवो धर्मो नश्यत्येव न संशयः॥ इति दिवोदासीये भविष्यद्वचनं॥ तन्मुख्यकाले चतुर्दश्यभावे अमादौ अरुणोदये

स्नातमसमित्येवं परा॥ चतुर्थघटिकायामरुणोदय इति तत्रैवोक्तं॥ ततः प्रदोषसमये दीपान्दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भव
नेषु मठेषु च॥ अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः॥ यममार्गांधकारेभ्यो मुच्यते कार्त्तिके नरः॥ अत्र मतत्रयमुक्तं॥ ब्राह्मे
यज्ञोपवीतिना कार्यं प्राचीनावीतिनाथवा॥ इदं जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः॥ इति पाद्मे॥ अपामार्गस्य पत्राणि
भ्रामयेच्छिरसोपरि॥ ततश्च तर्पणं कार्यं धर्मराजस्य नामभिः॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय स
र्वभूतक्षयाय च॥ औदुंबराय दध्नाय नीलाय परमेष्ठिने॥ वृकोदराय चित्राय चित्रगुप्ताय वै नमः॥ इति नरकचतुर्दशी॥ आ
श्विनामावास्यायां प्रातरभ्यंगं कुर्यात्॥ प्रत्यूष आश्वयुक्दर्शे कृताभ्यंगादिमंगलाः॥ भक्त्या प्रपूजयेद्देवीमलक्ष्मीविनिवृत्त
ये॥ स्वातिस्थिते रवाविंदुर्यदि स्वातीगतो भवेत्॥ पंचत्वगुदकस्नायी कृताभ्यंगविधिर्नरः॥ नीराजितो महालक्ष्मीमर्चयेच्छ्रि
यमश्नुते॥ कार्त्तिकशुक्लप्रतिपदि [illegible] क्रीडनमुक्तं॥ निर्णयामृते॥ अस्यामेव रात्रौ बलिपूजोक्ता हेमाद्रौ भविष्ये॥ बलिदानं तत्र
पूर्वविद्धा ग्राह्या॥ बलिमुद्दिश्य दीयंते दानानि कुरुनंदन॥ यानि तान्यक्षयाण्याहुः मयैवं संप्रदर्शितं॥ आवरणीति॥ अत्र [illegible] श्रा
बलिप्रतिपदं प्रक्रम्य॥ तस्यां द्यूतं प्रकर्तव्यं प्रभाते तत्र मानवैः॥ तस्मिन्द्यूते जयो यस्य तस्य संवत्सरं जयः॥ कार्त्तिकशुक्लद्वितीया
यमद्वितीया सा पूर्वयुता॥ दिनद्वये मध्याह्नव्यापिनी ग्राह्या॥ प्रतिपद्युता ग्राह्येत्युक्तं॥ निर्णयामृतादौ॥ यमो यमुनया पूर्वं भो
जितः स्वगृहेर्चितः॥ अतो यमद्वितीयेयं त्रिषु लोकेषु विश्रुता॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः॥ स्नेहेन भगिनीहस्ता
द्भोजनं पुष्टिवर्द्धनं॥ अर्च्चयेद्यापि तां पूज्यैर्न सा वैधव्यमाप्नुयात्॥ भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित्॥ दुर्जेयशुक्ल [illegible]

यायाम परा क्लिर्वे येद्यमं॥ स्नानं कृत्वा भ्रातृजायाय मलोकं न पश्यति॥ कार्त्तिकशुक्लनवमी युगादिः॥ सा पूर्वाह्णव्यापिनी ग्राह्या शुक्लप
क्षस्यत्वात्॥ अत्र पिंडरहितं श्राद्धं कर्तव्यं॥ मलमासे सति मासद्वयेपि कार्यं॥ अत्रैव विष्णुत्रिरात्रमुक्तं हेमाद्रौ॥ कार्त्तिके शुक्ल
नवम्यां यो वा प्य विजितेंद्रियः॥ हरिं विधाय सौवर्णं तु लक्ष्मासहितं विभुं॥ पूजयेद्विधिवद्भक्त्या व्रती तत्र दिनत्रयं॥ एवं यथोक्तवि
धिना कुर्याद्वैवाहिकं विधिमिति॥ कार्त्तिकशुक्लैकादश्यां भीष्मपंचकव्रतं उक्तं॥ नारदीये॥ कार्त्तिकस्यासिते पक्षे स्नात्वा स
म्यग्यतः व्रतः॥ एकादश्यां तु गृह्णीयाद्व्रतं पंचदिनात्मकं॥ कार्त्तिकशुक्लद्वादश्यां रेवतीयोगरहितायां पारणं कार्यं॥ आभाक
सितपक्षे तु शुभे त्र्यश्रवणरेवती॥ संगमे नहि भोक्तव्यं द्वादशद्वादशीं हरेत्॥ यदा रेवतीयोगरहिता न लभ्यते तदा रेवत्या
श्चतुर्थपादं वर्जयेत्॥ अथैकादश्यां बोधिनी विधिः॥ एकादश्यां च शुक्लायां कार्त्तिके मासि केशवं॥ प्रसुप्तं बोधयेद्रात्रौ
श्रद्धाभक्तिसमन्वितः॥ इति मदनरत्नेऽभिविधिः॥ देवस्तु द्वादश्यामेव प्रबोधः॥ कार्त्तिकशुक्लद्वादशी पौर्णमासी
च मन्वादिः॥ सा पौर्वाह्णिकी ग्राह्या शुक्लपक्षत्वात्॥ अनन्तभट्टोक्तं॥ कार्त्तिकशुक्ले चतुर्दशी वैकुंठचतुर्दशी॥ निशी
थव्यापिनी ग्राह्या॥ दिनद्वये तद्व्याप्तौ तिथौ प्रदोषव्यापिनी ग्राह्या॥ कार्त्तिकस्य सिते पक्षे चतुर्दश्यां नराधिप॥ सोपवास
स्तु संपूज्य हरिं रात्रौ जितेंद्रियः॥ इति॥ विश्वेश्वरप्रतिष्ठायां यदोपवासादि क्रियते तदा अरुणोदयव्यापिनी ग्राह्या॥ वर्षे च हेमलं
वारव्यमासेऽश्विमति कार्त्तिके॥ शुक्लपक्षे चतुर्दश्यामरुणाभ्युदयं प्रति॥ महादेवात्तियौ ब्राह्मे मुहूर्ते मणिकर्णिके॥ स्नात्वा
विश्वेश्वरदेवा विश्वेश्वरमपूजयेदिति॥ तत्पूर्वदिने च उपवासः कार्यः॥ कार्त्तिकव्रतोद्यापने॥ ऊर्जे शुक्लचतुर्दश्यां कृ

र्यादुद्यापनं व्रती॥ तुलस्याः उपरिष्टात्तु कुर्यान्मंडपिकां शुभां॥ कार्त्तिकपौर्णमासी परा ग्राह्या॥ अमापौर्णमासौ परे इति दीपि
कोक्तेः॥ आग्नेयं तु यदा ऋक्षं कार्त्तिक्यां भवति क्वचित्॥ महती सा तिथिर्ज्ञेया स्नानदानेषु चोत्तमा॥ विशाखासु यदा भानुः कृ
त्तिकासु च चंद्रमाः॥ संयोगः पद्मको नाम पुष्करेष्वतिदुर्लभः॥ पद्मके पुष्करे प्राप्य कपिलां यः प्रयच्छति॥ स हित्वा सर्वपापा
नि वैष्णवं लभते फलं॥ अस्यामेव सायंकाले मत्स्यावतारो जात इत्युक्तं॥ वरान्दत्वा यतो विष्णुर्मत्स्यरूपो भवेत्ततः॥ तस्यां
दत्तं कृतं जप्तं तदक्षय्यफलं स्मृतमिति पाद्मे॥ भार्गवार्चनदीपिकायामुक्तं॥ पौर्णमास्यां तु संध्यायां कार्त्तिक्यां त्रिपुरोत्स
वं॥ दद्यादनेन मंत्रेण प्रदीपांश्च सुरालये॥ अथ वृषोत्सर्गः॥ कार्त्तिक्यां यो वृषोत्सर्गं कृत्वा नक्तं समाचरेत्॥ शैवं पदमवा
प्नोति शिवव्रतमिदं स्मृतमिति॥ अत्र कार्त्तिक्यां कार्त्तिकेयदर्शनमुक्तं॥ काशीखंडे॥ कार्त्तिक्यां कृत्तिकायोगे यः कुर्यात्स्वा
मिदर्शनं॥ सप्तजन्म भवेद्विप्रो धनाढ्यो वेदपारगः॥ इति कार्त्तिकमासः॥ अथ मार्गशीर्षः॥ वृश्चिके शुक्लपक्षे उत्राघरिकाः
पुराणकालतः॥ ज्ञेयं प्राग्वत्॥ मार्गशीर्षकृष्णाष्टमी कालाष्टमी सा च रात्रिव्यापिनी ग्राह्या॥ मार्गशीर्षसिताष्टम्यां कालभै
रवसन्निधौ॥ उपोष्य जागरं कुर्वन्सर्वपापैः प्रमुच्यते॥ इति काशीखंडात्॥ रात्रिव्रतत्वाच्च॥ रुद्रव्रतेषु सर्वेषु कर्तव्या
संमुखा तिथिः॥ दिनद्वये रात्रिव्याप्तौ सा उत्तरैव॥ तेन मध्याह्नव्यापिनी उक्ता॥ दिनद्वये रात्रेः संपूर्णायां वा तद्व्याप्तौ पूर्वै
व पूर्वोक्तवचनात्॥ पारणं तु प्रातरेव॥ याममध्येऽर्धगामिन्यां प्रातरेव हि पारणं॥ इति वचनात्॥ पारणं तु प्रातरेव॥ या
मत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणं इति वचनात्॥ अत्रैव कालभैरवप्रीत्यै कृत्वा च विविधां पूजां महारात्रे जागरवि

ति.सि.नि. १९

स्तरैः॥ नरो मार्गसिताष्टम्यां वार्षिकं विघ्नमुत्सृजेत्॥ मार्गशीर्षशुक्लसुपंचम्यां नागपूजोक्ता हेमाद्रौ॥ पंचमी नागपूजा-
यां कार्या षष्ठीसमन्विता॥ तस्यां तु तुषिता नागा इतरा स चतुर्थिका॥ मार्गशीर्षशुक्लषष्ठी चंपाषष्ठी॥ इयं महाराष्ट्रे प्र-
सिद्धा सा उत्तरग्राह्या॥ इममियोगा वृक्षे न चंपे त्युच्यते॥ मार्गेनाड्रपदे शुक्ला षष्ठी वैधृतिसंयुता॥ रविवारेण संयुक्ता सा
चंपेति हि कीर्तिता॥ इति॥ इयमेव स्कंदषष्ठी॥ सा पूर्वयुता ग्राह्या॥ कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिश्चतुर्दशी॥ एताः पूर्वयु-
ता कार्यास्तिथ्यंते पारणं भवेदिति॥ मार्गशीर्षशुक्लचतुर्दश्यां पिशाचमोचनतीर्थश्राद्धं॥ पित्र्यादुद्देशाकलेपार्वणत्वादपराह्ण-
व्यापिनी ग्राह्या॥ अत एतानामपि पिशाचपुद्देशाकलेति कोद्दिष्टकल्पान्मध्याह्नव्यापिनीति॥ कुलधर्मादौ तु स्मरेत्॥
मार्गशीर्षशुक्लपौर्णमास्यां दत्तात्रेयोत्पत्तिः॥ इयं प्रदोषव्यापिनी तिह्याः॥ मार्गशीर्षे तथा मासि दशमेह्नि सुनिर्मले॥ मृग-
शीर्षयुते पौर्णमास्यां शुक्रसवासरे॥ जनयामास देदीप्यमानं पुत्रं सतीसुभे॥ तं विष्णुमागतं तात अत्रिर्नामकरोत्स्व-
यं॥ कृतवान्स्वस्य पुत्रत्वाद्दत्तात्रेय इति स्मरन्निति॥ मार्गशीर्षपौर्णमास्यानंतरा अष्टमी अष्टका॥ एवं पौषमासम- रा.म.
त्रयोपि॥ मार्गशीर्षे च पौषे च माघे प्रोष्ठे च फाल्गुने॥ कृष्णपक्षे च पूर्वेद्युरन्वष्टक्यं तथाष्टका॥ इति॥ तत्राष्टम्यपराह्ण- १९
व्यापिनी ग्राह्या॥ अष्टकाख्यौ विश्वेदेवा इति संग्रहकारः॥ अत्र श्राद्धाकरणे प्रायश्चित्तमुक्तं॥ कल्पविधाने॥ एतन्निपुणि-
जपेन्मंत्रं रात्रावष्टक तद्दिने॥ अन्वष्टक्यं यदा शूद्रैः पूर्वेद्युर्या तिसर्वथैव तु॥ महालयाष्टकाश्राद्धोपाकर्मद्युपिकर्मयत-
स्याष्टमास विशेषात्रयाविहितं वर्जयेन्मल इति॥ इति मार्गशीर्षमासः॥ अथ पौषः॥ धनुःसंक्रमे पराः षोडश नाड्यः पुण्याः

अर्द्धरात्रात्परतः॥ अत्रैवोत्सर्जनं निर्णयो वक्तव्योप्युपाकर्मप्रसंगात्प्रागेवोक्तं॥ कल्पतरौ भविष्ये॥ पौषशुक्लाष्टम्यां बुधाष्टमी
व्रतं॥ पौषे मासि यदा देवि शुक्लाष्टम्यां बुधो भवेत्॥ तस्यां स्नानं जपो होमं तर्पणं विप्रभोजनं॥ मत्प्रीतये करं देवि ज्ञातसा-
हस्रकं भवेत्॥ अत्रैव रोहिण्यार्द्रायोगे पुण्यतमत्वं तत्रैवोक्तं॥ पौषशुक्लैकादशी मन्वादिः॥ साचोक्ता प्राक्॥ पौषपूर्णिम्यनं-
तराः सप्तम्यष्टमीनवम्योऽष्टकाख्याः प्रागुक्ताः॥ पौषामावास्यायामर्धोदययोगविशेषः॥ उच्यते॥ अमार्कपातश्रवणै-
र्युक्ता चेत्पुष्यमाघयोः॥ अर्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः॥ इति॥ पुष्यमाघयोर्मध्यवर्तिनी पौर्णिमास्युरमा-
वास्येत्यर्थः॥ इति धर्तुष्यस्य माघस्येत्यर्थः॥ इत्युक्तं मदनरत्ने॥ तत्र हेमाद्रिविशेषमाह॥ तत्र हि माघ पूर्वोक्तः॥ हेमाद्रौ म-
दनरत्ने स्कांदे॥ माघमास्यां व्यतीपाते आदित्ये विष्णुदैवते॥ अर्धोदये तद्दिव्याकुः॥ सहस्रार्कग्रहैः सममिति॥ दिवैव
योगश्चायं न तु रात्रौ कदाचनेति॥ अर्धोदये तु संप्राप्ते सर्वं गंगाजलं समं॥ शुद्धात्मानो द्विजाः सर्वे भवेयुः ब्रह्मसंमि-
ताः॥ यत्किंचिद्दीयते दानं मेरुसन्निभमिति॥ इति पौषमासः॥ अथ माघमासः॥ अत्र स्नानव्रतानि॥ एकादश्यां शुक्लप-
क्षे पौषे मासे समाचरेत्॥ द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनमिति॥ निपत त्रिंशद्दिनत्वाच्छुभे मास्यारभ्य
समापयेत्॥ मलमासेपि वा व्रतमिति॥ स्नानकालः॥ अरुणोदयमारभ्य यावत्कालावधिः श्रुतौ॥ माघस्नानव्रतापु-
ण्यं क्रमात्तत्र विधारणा॥ शक्त्यापेक्षया व्यवस्था॥ मकरसंक्रांतौ हेमाद्रिमते परतश्चत्वारिंशद्घटिकाः पुण्यकालः।
त्रिंशत्कर्कटके नाड्यो मकरे तु दशाधिकाः॥ इति माधवमते विंशतिः॥ त्रिंशत्कर्कटके पूर्वा मकरे विंशतिः परे इति॥

तिथिनि॰ रद्धवसिष्ठोक्तेः॥ यदा तु सूर्यास्तात्पूर्वसमये संक्रान्तिर्भवति तदा मध्यमते पूर्वमेव पुण्यकालः॥ रात्रौ तु॥ प्रदोषे वा निशीथे वा
२० माधवमते॥ द्वितीयदिनं पुण्यं॥ यदस्तसमयवेलायां मकरं याति भास्करः॥ प्रदोषे वार्धरात्रे वा स्नानं दानं परेऽहनि॥ इति वृद्धव
सिष्ठोक्तेश्च॥ निर्णयामृते पाराशरीयेनैवं॥ दाक्षिणात्यास्त्वेतद्वाक्यं पंते॥ हेमाद्रिस्तु अस्तमयात्पूर्वं यामद्वयादिमते तु निशीथात्पू
र्वं परश्चेत् संक्रान्तौ पूर्वदिनं परदिनं च पुण्यं॥ अपरार्के प्येवं॥ अस्तं गते यदि ग्रसं यदि याति दिवाकरः॥ प्रदोषे अर्धरात्रे
वा तदा पुण्यं दिनद्वयमिति॥ बौधायनवचनात्॥ दिनद्वयं तदा पुण्यकालः॥ धनुर्मीनवति क्रमात् कन्यां च मिथुनं तथा॥
पूर्वापरादिभागेन रात्रौ संक्रमते यदा॥ दिनांते पंचनाड्यस्तु तदा पुण्यतमाः स्मृताः॥ उदयेपि तथा पंच दैवे पित्र्ये च क
र्मणीति॥ गुर्जरप्राच्यौ दिव्याः स्विदमेवाद्रियंते॥ माघशुक्लचतुर्थी तिलकुचतुर्थी सा प्रदोषव्यापिनी ग्राह्या॥ त
दुक्तं तपरायणाना मेहेधुंढेर्वंतियंति ते शास्सुरस्मरं कुहमिति॥ माघमासे चतुर्थ्यां तु तस्मिन्काले उपोषितः॥
अर्चयित्वा तु यो देवी नागरं तत्र कारयेत्॥ इति॥ इयमेव कुंदचतुर्थी चतुर्थ्यां प्रदोषव्यापिनी ग्राह्या॥ माघशुक्ल
चतुर्थ्यां तु कुंदपुष्पैः सदाशिवं॥ संपूज्य योऽदिनक्तासी स प्राप्नोति श्रियं नरः॥ इति॥ माघशुक्लपंचमी श्रीपंचमी॥ पर राम॰
ग्राह्या॥ माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः॥ पंचम्यां कुंदपुष्पैश्च पूजां कुर्यात्समृद्धये॥ इयं माधवमते पूर्वा॥ चैत्र २०
शुक्ले श्रीपंचमीति दिवोदासः॥ माघशुक्लसप्तमी रथसप्तमी॥ सा अरुणोदयव्यापिनी ग्राह्या॥ यदा पूर्वेद्युः घटिकाद्व
यषष्ठी सप्तमी परेद्युः क्षयवशादरुणोदयात्पूर्वं समाप्यते तत्र संदेहे॥ सूर्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी॥ अ

दिनद्वयेतद्व्याप्त्यभावव्याप्तौ वा पूर्वैवेति निर्णयामृतं २

रुणोदयवेलायां तस्यां स्नानं महाफलमिति॥ विष्णुवचनात्॥ तथा जन्मशतक्रम्य॥ नके न धार्यते यावत्तावत्स्नानं समाचरेत्॥
जलोपरि चरेद्दीपं ध्यात्वा संतर्प्य देवता॥ इति॥ इयं मन्वादिरपि॥ शुक्लपक्षस्य तान्यौ वीक्षिकी ग्राह्या॥ यदा माघो मलमासो
भवति तदा मासद्वये मन्वादिश्राद्धं कुर्यात्॥ माघशुक्ला अष्टमी भीष्माष्टमी॥ तदुक्तं हेमाद्रौ पाद्मे॥ माघमासस्य सिताष्टम्यां
सतिलं भीष्मतर्पणं॥ श्राद्धं च ये नराः कुर्युस्ते स्युः संततिभागिनः इति॥ भारते पि॥ शुक्लाष्टम्यां तु माघस्य दद्याद्भीष्माय यो
जलं॥ संवत्सरकृतं पापं तत्क्षणादेव नश्यति॥ अत्रैव विधि वदद्युः सर्वे वर्णा द्विजादयः॥ तर्पणमंत्रस्तु॥ भीष्मः शांतनवो वीरः सत्य
वादी जितेंद्रियः॥ आभिरद्भिरवाप्नोति पुत्रपौत्रोचितां क्रियां॥ वैयाघ्रपदगोत्राय सांकृत्यप्रवराय च॥ अपुत्राय ददाम्येतज्जलं
भीष्माय वर्मणे॥ वसूनामवताराय शंतनोरात्मजाय च॥ अर्घ्यं ददामि भीष्माय आबालब्रह्मचारिणे॥ इति॥ एतच्च जीवत्पि
तृकस्यापि भवति॥ जीवत्पितापि कुर्वीत तर्पणं यमभीष्मयोः॥ इति॥ एतच्चापसव्येन कार्यमिति॥ दिवोदासीये॥ अत्र का
म्यश्राद्धं तत्पर्णेश तु नित्यं॥ माघशुक्ला द्वादशी भीमद्वादशी॥ इयं शुद्धैव मुख्या ग्राह्या॥ त्वमा कृतमिदं वीरतयनाम्ना च विष्यति॥ मा
भीमद्वादशी सेयं सर्वपापहरा शुभा॥ इति॥ माघी पूर्णिमा परेत्युक्तं प्राक्॥ माघकृष्णसप्तमी अष्टमी नवम्योऽष्टकाः॥ त
न्निर्णयः पूर्वमुक्तः॥ माघकृष्णचतुर्दशी शिवरात्रिः॥ सा प्रदोषनिशीथोभयव्यापिनी ग्राह्या॥ पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव
निशीथव्याप्तौ हेमाद्रिमते पूर्वा माधवमते परा॥ मात्रकेषु वि केचित्तु प्रदोषव्यापिनी त्युक्तं॥ केचित्तु निशीथव्यापि
नी॥ तत्रादौ माधवीये॥ त्रयोदश्यस्तगे सूर्ये चतसृष्वेव नाडिषु॥ भूतविद्धा तु या तत्र शिवरात्रिव्रतं चरेत्॥ प्रदोषव्या

तिथि॰ पिनी ग्राह्या शिवरात्रिश्चतुर्दशी ॥ रात्रौ जागरणं यस्मात्तस्मात्तां समुपोषयेत् ॥ अर्धरात्रियुता यत्र माघकृष्णचतुर्दशी ॥ शिवरात्रिव्र
२१ तं तत्र सोऽश्वमेधफलं लभेत् ॥ एवं सति पूर्वेद्युरेवोभयव्याप्तौ पूर्वैव ॥ त्रयोदशी यदा देवि दिनभुक्तिप्रमाणतः ॥ जागरे शिवरात्रि
स्यान्निशि पूर्णा चतुर्दशीति ॥ दिनभुक्तिरस्तमयः ॥ दिनद्वये निशीथव्याप्तौ तु हेमाद्रिमते पूर्वा परदिने प्रदोषनिशीथोभय
सत्त्वात्परैवेति माधवः ॥ इदमेव च युक्तं ॥ प्रतिभाति ॥ पूर्वेद्युः निशीथव्याप्तौ परेद्युः प्रदोषव्याप्तौ एकैकव्याप्तौ तु परैवेति ॥ जयायोग
प्रशस्त्यात् ॥ यदा चतुर्दशी पूर्वेद्युर्निशीथादर्वाक् परेद्युश्च निशीथादर्वाक् समाप्ता तदा परेद्युरेकव्याप्तिसत्त्वात्परैवेति ॥ ए
वं दिनद्वये प्रदोषव्याप्त्यभावे निशीथव्याप्तिसत्त्वे पूर्वैव ॥ तिथिमध्येपि पारणं स्कांदे ॥ उपोषणं चतुर्दश्यां चतुर्दश्यां तु पारणं ॥ कृ
तैः सुकृतलक्षैश्च लभ्यते नाथवा ॥ तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीं ॥ इति ॥ अत्र यामत्रयादर्वाक् चतुर्दशीसमाप्तौ तदं
ते तदूर्ध्वगामित्वे प्रातः स्थितौ तिथिमध्य एवेति हेमाद्रिमाधवयोर्व्यवस्थाप्राकृतः ॥ तत्र ॥ यामत्रयोर्ध्वगामिन्यां प्रातस्तदंते वहि पारणं स्यादि
मामाव वचनैरेव व्यवस्था सिद्ध्ये ॥ उभयविधवाक्यवैयर्थ्यं स्यादुपहस्यात् ॥ इदं व्रतं नित्यं काम्यं च ॥ यामचतुष्टये पूजाविधाना राम॰
द्यस्मिन्दिने अधिकं रात्रिव्याप्तिः स्यात्सा ग्राह्या ॥ सा यदि पूर्वेतरे मार्गिरुचिवान् ॥ मासशिवरात्रौ त्वयं निर्णयः ॥ दिनद्वये २१
दा मासशिवरात्रिश्चतुर्दशी ॥ प्रदोषे यदि वर्तेत कर्तव्या सा परा बुधैः ॥ भूरिजन्मा वस्तुतस्तु ॥ प्रतिमासं कृष्णचतुर्दश्यामपि
शिवरात्रिशब्दप्रयोगात् ॥ कौंडपायनामयनाग्निहोत्रे नेकृत्याग्निहोत्रधर्मा इव तद्धर्मप्राप्तिः स्यादेव ॥ अतः प्रदोषनिशीथो
भयव्याप्तिवन्निर्णय इति वयं मन्यामहे ॥ माघामावास्या युगादिः ॥ तदुक्तं ॥ माघमासे तु मावास्येति अनन्तागवत् ॥ इति मा

घमासः ॥ अथ फाल्गुनः ॥ कुंभे पूर्वाः षोडश घटिकाः श्रेष्ठं प्राग्वत् ॥ फाल्गुनी पौर्णमासी होलिका ॥ होलिका सा प्रदोष
व्यापिनी ग्राह्या ॥ दिनद्वये प्रदोषव्याप्तौ यथा यदा पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परेदिने पौर्णिमा सायाह्नव्यापिनी तदा के
वलचिन्त्यते परदिने केवलचिन्त्यते तु तत्रैव ॥ भद्रामुखं वर्जयित्वा कार्या ॥ प्रदोषव्यापिनी ग्राह्या पूर्णिमा फाल्गुनी सदा ॥ तस्यां भ
द्रामुखं त्यक्त्वा पूज्या होला निशामुखे ॥ इति नारदवचनात् ॥ दिनद्वये प्रदोषव्याप्तौ परैव पूर्वदिने भद्रासत्त्वात् ॥ भद्रायां दीपि
ता होलिका राष्ट्रभंगकरी तथा ॥ यदा तु पूर्वदिने चतुर्दशी प्रदोषव्यापिनी परदिने च पौर्णिमास्त्यय वत्रगास्तायाः कालत्यागे व समा
प्तेः ॥ तदा पूर्वदिने संपूर्णा रात्रौ भद्रासत्त्वात्तत्र च तन्निषेधात्परे द्युनि प्रतिपद्येव कुर्यादिति ॥ गोविंदार्णवादयस्तु ॥ तस्याः नरदमु
खं त्यक्त्वेति ॥ कृतानानी मलमासे न भवती ॥ इयं मन्वादिरपि ॥ सा तु पौर्वाह्णिकी ग्राह्या शुक्लपक्षस्य तात् ॥ मलमासस्त्वन्या
सह्यं मन्वादिश्राद्धं ॥ चैत्रकृष्णप्रतिपदि वसंतोत्सवः ॥ सा चोदयिकी ग्राह्या दिनद्वये तदा पूर्वा ॥ वत्सरादौ वसंतादौ
बलिराज्ये तथैव च ॥ पूर्वविद्धा प्रकर्तव्या प्रतिपत्सर्वदा बुधैरिति गोविंदार्णवे वृद्धवशिष्ठवचनात् ॥ प्रातः ॥ वंदयेद्धो
लिकाभूतिं सर्वदुःखोपशांतये ॥ मंत्रश्च ॥ वंदितासि सुरेंद्रेण ब्रह्मणा शंकरेण च ॥ अतस्त्वं पाहि नो देवी भूते भू
तिप्रदा भवेति ॥ फाल्गुनकृष्णपक्षे सप्तमी अष्टमी नवम्यो ष्टकाः ॥ प्राग्वत् ॥ फाल्गुनकृष्णाष्टम्यां विशेषः ॥ फाल्गु
नस्य च मासस्य कृष्णाष्टम्यां महीपते ॥ इत्युपक्रम्य ॥ जाता दाशरथी पत्नी तस्मिन्नहनि जानकी ॥ उपोषितो
रघुपतिः समुद्रस्य तदा -- रामपत्नी च संपूज्यासीत् जनकनंदिनी ॥ इति ॥ चैत्रामावास्या मन्वादिः ॥ सा चाप

रात्रिव्यापिनी ग्राह्या सा तामस्सपक्षस्य त्वा त्॥ इति फाल्गुनः॥ इति संवत्सरकृत्यतिथिनिर्णयः॥ अथ यागकालः॥ पर्वणो यश्चतु
तिथिनि. र्थो भाग आद्या प्रतिपत्त्रयः॥ यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिः॥ इति स्मृत्यापाकः॥ दर्शे यत्रापराह्णं स्पृशति स दिवसः
२२ श्राद्धकालो द्वयोर्वोदयात्तानन्त्या प्रतिपदा यदि भवति स मक्षीयमाणे तु पूर्वः॥ वृद्धौ साम्ये पन्नग्नेषु सुवति हि पत्नयोस्त्वपरा
वमाहिताग्नेः॥ पूर्वोत्तकाः परक्षं स्पृशति कुतुपसंस्पर्शतिथ्यां विधिः स्यात्॥ पूर्वाह्णो वै देवानां अपराह्णः पितॄणाम्॥ सायं ते
न्यपरात्रविन्मृततिथिः सैवाब्दिके मासिके॥ ग्राह्यासा दपराह्णयोर्यदि तदा यत्राधिका सा मता॥ तुल्या चेदुभयापराह्ण
समये पूर्वाह्णन चेत द्वयोः पूर्वैव त्रिमुहूर्तगास्तमये नो चेत्सुरैर्वाचिता॥ इति दर्शनिर्णयः॥ अथैकादशी आदित्योदयवेधस्तु
स्मार्तानां कथितो बुधैः॥ अरुणोदयवेधस्तु स्मार्तानां कथितो बुधैः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ सर्वैरेवोत्तराका
धी. र्या परतो द्वादशी यदि॥ एकादशी द्वादशी च विशुद्धा यत्र वर्तते यदि॥ तदा पूर्वदिनं त्याज्यं स्मार्तैः कार्यं परं दिने॥ भविष्ये तु॥ संपूर्णैका
दशी यत्र प्रभाते पुनरेव सा॥ लुप्यते द्वादशी यत्र उपवासः कथं भवेत्॥ उपोष्ये द्वे तिथी चैव यत्र स्मार्तैरपि मुमुक्षुराः॥ पारणं तु राम.
त्रयोदश्यां केचिदाहुर्मनीषिणः॥ एकादशी व्रतं श्रेष्ठं गृहिणा ह्युषाकैः तत्कं च यत्॥ स्मार्तैस्तु देव कर्तव्यं वृद्धव्याघ्रपाद २२
गोभिलः॥ एकादशी यदा वृद्धिं परे द्युपुनरेव सा॥ स्मार्तैः कार्या सदा पूर्वा द्वादशी परतो यदि॥ एकादशी द्वादशी च लभेत तु
क्षयं नहि॥ अविद्धैकादशी कार्या गृहस्थैर्यतिभिः परेति॥ माधवो गोभिल्ज जावालिर्विहितं तः॥ व्याघ्रपदानामप्येवमेवेति॥
अथ विद्धैकादशी कर्तव्येति कालनिर्णये॥ दशमीशेषसंयुक्ता उपोष्यैकादशी सदा॥ बदान स्पात्रपोदश्यां कालनार

वाद्वादशी यदि॥ मार्कण्डेयः॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां सदेति॥ अ
त्र कामी गृहीति: कामो यतिः स्मृतिरपि॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ उत्तरां तु यतिः कुर्यात्पूर्वामुपवसेद्गृ
हीति॥ गालवः॥ एकादश्युदये किंचित्परतो द्वादशी न चेत्॥ त्यक्त्वा मुद्रामपि श्रौतैः स्मार्तैः कर्तव्या दशमीयुतेति चेत्
उद्दालकाचार्य गालवमते॥ अत्र वैष्णवैकादशी निर्णयः॥ नारदः॥ उदयात्प्राक् यदा चेन्नाड्यश्चतस्रो घटिकास्तु याः॥
अरुणोदयविद्धैषा सदानोपवसेद्धरीति॥ अरुणोदयवेलायां दशमी यदि दृश्यते॥ सा विद्धैकादशी तत्र पापमूलमु
पोषणं॥ पाद्मे॥ नवमीपलमेकं तु दशमी परतो यदि॥ उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणं॥ अविद्धैकादशी य
त्र पूर्णा सा द्वादशी भवेत्॥ त्रयोदश्यां क्रियन्मात्रा द्वादशी यदि वा भवेत्॥ उपवासद्वयं कार्यं विष्णुभक्तैर्विशेषतः॥
विष्णुप्रीत्यार्थैः कार्यं द्वादश्यामेव पारणं॥ एकादशीमुपोष्याथ द्वादशीं समुपोषयेत्॥ न तत्र विधिलोपः स्यादुभयोर्देवतं
हरिः॥ अन्त्याया मध्यवृद्धिर्वैद्वादश्यामरुणोदये॥ स्नानार्चनक्रियाकार्या दानहोमादिकाश्रयाः॥ पंचपंचउषःकाल
पं सप्तपंचारुणोदयः॥ अष्टकं च भवेत्प्रातः ततो सूर्योदयः स्मृतः॥ गङ्गायेकादशीनिर्णयः॥ उपवासे त्वशक्तानां नराणां
मूर्च्छिणामपि॥ एकभक्तादिकं कार्यमिति बौधायनोऽब्रवीत्॥ असमर्थो शरीरस्य व्रते च समुपस्थिते॥ कारयेद्धर्मपत्नीं वा
पुत्रं वा विधिवत्स्थितः॥ भार्या पत्युर्व्रतं कुर्यात् भार्यायाश्च पतिर्व्रतं॥ असामर्थ्ये तु रोरस्य व्रतभङ्गो न जायते॥ संक्रा
न्ति संकटे कार्ये द्वादश्यां यामपूर्वकं॥ अद्भिस्तु पारणं कुर्यात् पुनर्भुंजन दुष्यति॥ इति पारणविधिः॥ अथ अष्टमहाद्वा

तिथिनि. दश्यः॥ दशमीवेधरहितैकादशी परदिने किंचिन्मात्रा द्वादश्यपि तेन द्वादशी सा उन्मीलनी द्वादशी॥ १॥ द्वादशीमात्रवृद्धौ वं-
२३ जुली॥ २॥ एकादशी द्वादशी त्रयोदशी योगे स्पृशा॥ ३॥ षष्टिघटिका भूत्वा पूर्णिमामावास्या वा परदिने कियन्मात्र-
वर्धते सा पक्षवर्धिनी॥ ४॥ पुनर्वसुयोगे जया॥ ५॥ श्रवणयोगे विजया॥ ६॥ पुष्ययोगे पापनाशिनी॥ ७॥ रोहिणीयो-
गे जयन्ती॥ ८॥ रोहिणी श्रवणयोश्चेत् षष्टिघटिका भूत्वा पारणादिने वर्धेते तदा नक्षत्रमध्य एव पारणं तिथ्याधिक्ये तु
नक्षत्रान्त एव पारणम् इति॥ नृसिंहपरिचर्यायां॥ विनोदकेन यत्कार्यं मकं चेत्ता तवेदसि॥ तत्सर्वं फलवत्स्यात् इति वे-
दविदो विदुः॥ एकादश्यां तु कृष्णायां न किंचिदपि भक्षयेत्॥ कृष्णायां भक्षयेत् किंचिद् दन्तीकाष्ठादि केचनाश्नद-
यौ वैकवसंक्रां॥ द्वौ वसितौ द्वादशी दिने॥ तथा चैव कृते श्राद्धे पुत्रान्नोपवसेत् हीनं ति॥ इत्येकमहाद्वादशीनिर्णयः॥
अथ पुण्यतिथिः॥ अमावास्या तु सोमेन सप्तमी भानुना सह॥ भौमवारे चतुर्थी तु बुधवारेणाष्टमी॥ चतस्रस्तिथयः स्मृ-
ता सूर्यग्रहणसंनिभाः॥ इति पुण्यतिथयः॥ अथ तर्पणकालः॥ सूर्ये तिलोदकं दत्वा अमाश्राद्धं तु कारयेत्॥ प्रत्यहं नभ-
वेत्पूर्वं परेद्युर्दिति तिलोदकं॥ न चैवाथ नित्यतर्पणस्यैवोत्कर्षं परेद्युर्नीति पुनः श्राद्धांगतर्पणं पृथगस्तीति वाच्यं॥ अपेक्षा- राम.
विकश्राद्धे॥ नित्यतर्पणं च प्रकार्यं॥ अतिसेषां विवर्जयेत्॥ किं पुत्रित् श्राद्धेषु निषिद्धा॥ हृदन्तारद्वीपे॥ वृद्धिश्राद्धे सपिंड्यां च प्रेत- २३
श्राद्धे तु मासिके॥ संवत्सरविमोके च न कुर्यात्तिलतर्पणं॥ अपरपक्षे विशेषः॥ कृष्णे भाद्रपदे मासि श्राद्धं प्रतिदिनं भवेत्॥
पितॄणां प्रत्यहं कार्यं नित्यं सिद्धे हि पितर्पणमिति॥ निषिद्धाहे पीतिसमभिव्याहारात्॥ सहस्रमहालये चक्षा दृष्टकास्वितदेवहि

यत्तु वचनेनैव श्राद्धदिने कुर्यात्तिलैस्तु तर्पणं॥ श्राद्धं कृत्वा परेद्युरेव तर्पणं तु दिलैर्गृहे इति॥ तत्राद्यार्थे न नित्यतर्पण एव वार्षिकदिने तिल-
मात्र निषेधः॥ अमाश्राद्धे यदि सायं ब्राह्मणनिमंत्रणार्थं श्राद्धसंकल्पं कृतः॥ प्रातर्वा तदा श्राद्धप्रयोगमध्ये स्वात्सायंकृत्वा ब्रह्मयज्ञांगत-
र्पणेनैव श्राद्धांगभूतं तत्पूर्वं तर्पणं पट्टदेवत्वं तंत्रेण प्रसंगेन वा सिध्यति॥ एतदमावास्यायां न तिलतर्पणं पृथं भवति॥ य-
दि प्रसमर्था पूर्वं श्राद्धकरणं न संकल्पितं तदा ब्रह्मयज्ञांगतर्पणोत्तरे श्राद्धकरणे संकल्पिते श्राद्धांगतर्पणं पृथक् कार्यं॥ मा-
तापित्रोर्वार्षिके तु ब्रह्मयज्ञांगतर्पणं तिलरहितं सर्वं कार्यं॥ सप्तम्यां भानुवारे च मातापित्रोर्मृतेऽहनि॥ तिलैर्यस्तर्पणं कुर्यात् स भवे-
त्पितृघातक इति॥ स्मृतिरत्नावल्यां मनुवचनात्॥ यत्तु कात्यायनवचनं॥ उपरागे पितुःश्राद्धे पाते मासांत संक्रमे॥ निषिद्धेपि हि
सर्वत्र तिलैस्तर्पणमाचरेत् इति॥ तत्पितृश्राद्धांग द्वितीयदिन कर्तव्य तर्पण विषयकं॥ पूर्वोक्तसंग्रहवचनानुरोधात्॥ वार्षि-
कांगतर्पणं तु प्रातर्निषिद्धिस्मर्ये पितर्पणानंतरं पुनर्निस्त्रविधि स्नात्वा वस्त्रं धारयेत्॥ पक्षश्राद्धे हिरण्यश्राद्धे ब्राह्मणविसर्जनानं-
तरं तद्दहरेव तर्पणमुद्दिष्टं पितॄणां॥ श्राद्धात्पूर्वं नित्यतर्पणं भवेत्सेव॥ सहस्रमहालये सांवत्सरीके च वसुतर्पणं दद्युः॥ श्राद्धानंतरं स-
वा तर्पितेत्॥ अष्टकाश्राद्धे तु सप्तम्यष्टमी श्राद्धयोर्विसर्जनानंतरं तद्दहरेव पितृमातामहवर्गद्वयस्यापि तिलतर्पणं कुर्यात्॥ तीर्थश्रा-
द्धे दर्शश्राद्धे विकृतीना अपमपमेव तर्पणं॥ अष्टकादिकृतिषु मघावर्षादिषु च अष्टकादिषु वत्॥ विसर्जनांते त्यादिवत्॥ त्रैमेंव॥ सर्व-
त्र श्राद्धांगतर्पणे दस्त्वादिरूपेणैव देश्यता॥ वसुरुद्रादित्यरूपा ध्रुवा इत्येतर्पये तृप्यन्तिति स्मृत्यर्थसारवचनात्॥ महालयेन
व्यतीपातसंक्रांत्यादिश्राद्धप्रसंगसिद्धौ महालयश्राद्धांगतर्पणेनैव व्यतीपातश्राद्धादिश्राद्धांगता यदा तु विशेषो ग्रहण तत्राप्यं तंत्रता

ति.नि. २४

तदा श्राद्धसमसंख्यतायां विकल्प्य आद्यावंतर्वेति द्विषमसंख्यत्वे वृद्धं चइति॥ यश्चविकाह ब्रतचूडामुवर्षमर्दितद्वर्षिकं॥ पिंडदानं मृदास्मा नेंतकुर्यान्निलतर्पणमिति॥ तदष्टका श्राद्धेमहालये चतम्रवर्नते॥ तीर्थेतिथि विशेषेचगयायांप्रेतपक्षके॥ निषिद्धेपिदिने कुर्या त्तर्पणंतिलमिश्रितमिति वचनात्॥ यत्तुस्मृतिसंग्रहवाक्यात्पठेतिं॥ पित्रोःक्षयाहे संप्राप्ते यः कुर्यात्तिलतर्पणं॥ आसुरंतर्पणं ज्ञेयं ततोसृक् धिरं भवेत्॥ सर्वदातर्पणं कुर्यात् ब्रह्मयज्ञपुरःसरं॥ मृताहे नैवकर्तव्यं कृते चेत् निष्फलं भवेत्॥ इत्यादितत्पूर्वलिखितसमूलकं नाना वचनविरोधः॥ प्रयोगपारिजातादिषु दर्शनाच्च निर्मूलं॥ समूलत्वे पूर्वलिखितबहुवचनावचनविरोधः॥ प्रयोगपारिजातादिषु दर्शनाच्च निर्मूलं॥ समूलत्वे पूर्वलिखितवचनानुरोधेन तिलतर्पणनिषेधपरं॥ कपिंजलः॥ ज्येष्ठभ्रात पितृज्येष्ठसपत्नीमातर स्तथा॥ एतेषांतु मृताहे तु परेद्युर्नितिलोदकं॥ मन्वादिषु युगाद्यासु दर्शसंक्रमणेषु च॥ पौर्णमास्यां व्यतीपाते दद्यान्नैवति लोदकं॥ अर्धोदये जगच्छाये वद्ध्यां चैव महालये॥ भरण्यां च मघा श्राद्धे पिंडे तर्पणं विदुरिति॥ अंगिरः॥ तिस्रोष्ट कासु तिथिषु मन्वाद्यासु मासिके॥ गयाश्राद्धे तीर्थश्राद्धे पिंडेतर्पणं वरेदिति॥ ब्रह्मवल्कः॥ कारुण्येषु गयाश्राद्धे मातापित्रोः स्मृतौ स्मृते॥ पत्नीपुत्रे भगिन्यादिकनिष्टभ्रातृवत्सरे॥ श्वशुरे पितृष्वसा चैव मातृष्वसृ सुवत्सरे॥ अपुत्रके पुत्रश्राद्धे दद्युः पिंड राम. २४
न जलं जलीन्॥ शौनकः॥ मातापित्रोर्मृताहे तु परेहनि तिलोदकं॥ कारुण्यं श्राद्धविषये सर्वोदद्यात्तिलोदकमिति॥ इति त र्पणकालनिर्णयः॥ अथशूद्राणां मासिकं च निर्णयः॥ स्मृतिकौमुद्यां मंगिराः॥ शूद्रेत्रिवर्षान्यूने तु मृते शुद्धिस्तु पंचभिः॥ अत ऊर्ध्वं मृते शूद्रे द्वादशाहो विधीयते॥ षट्‌वर्षांतमतीतो वा शूद्रः संम्रियते यदि॥ मासिकं तु भवेच्छौच मित्यंगिरसम्भाषितं महा

हारितः॥ आमौंजि बंधनाद्विप्रक्षत्रियस्य चतुर्थ्यहात्॥ अप्रतीत्य ब्रह्मदं स्वयं शूद्रो वस्त्रादानग्रहात्॥ षोडशवर्षदेशीयः शूद्रो वस्त्र क्रयग्रहणापो र्यं यो ज्ञातिः स्वर्थः॥ प्रागष्टमात् शिशुः प्रोक्तः आषोडशात् भवे बाल इति॥ केषांचिन्मते अष्टमास्या ऊर्ध्वं मासिकं च शुद्धिः॥ ऊर्ध्वं तु षट्‌भ्यो व र्षेभ्यः शुद्धिः शूद्रमासिकी॥ अस्मत्पक्षितमस्याष्टवर्षत्वमासइति॥ निबंधांतरे॥ द्वादशाब्दसंमतं॥ एते च पक्षादेशभेदेन गुणावद्गुण साभ्यां व्यवस्थाप्याः॥ षोडशवर्षानंतरं शूद्रस्य विवाहाभावेपि मासमाशौचमिति॥ अतएव शंखः॥ आषोडशाब्दात् शूद्रस्य यो उत्रा दत्तमाससरं॥ मृत्युंसमधिगच्छेत मासं तस्याथ बांधवाः॥ शुद्धिसमनुगच्छेतिनात्र कार्या विचारणा॥ इति शूद्राशौचनिर्णयः॥ इति रघुनाथभट्टविरचिते तिथिनिर्णय प्रकरणं समाप्तं॥ अत्रश्राद्धपरिभाषानलिखितं विस्तरभयात्॥ मासचतुर्थीनिर्णयः॥ संकष्टहरी किलया चतुर्थी सेंदूदयव्यापिनी॥ पूर्वापरा वापि तथा विशेषान्नचेद्युगमेपिच तदापरेव॥ विष्णुपंचकव्रतं चातुर्मास्ये पुष्कार्येएकादशीदमं चैव अमापूर्णतिथेव च॥ श्रवणं पंचकं चैव विष्णुपंचकमुच्यते॥ इति॥ ॥इति श्री रघुनाथभट्ट विरचितं तिथिनिर्णयः समाप्तः॥ ॥श्रीरस्तु॥ ॥भग्नपृष्टिकटिग्रीवा स्तब्धदृष्टिरधोमुखं॥ कष्टेन लिखितं ग्रंथं य त्नेन परिपालयेत्॥ ॥जलाद्रक्षेत्तिलाद्रक्षेद्रक्षेत् शिथिलबंधनात्॥ पर हस्ते न दातव्यं एवं वदति पुस्तकं॥ ॥श्री श्री॥ संवत् १८ ५८ शाके १७२३ प्रवर्तमाने चैत्रमासे शुक्लपक्षे ८ मंदवासरे॥ लिखितं मिदं पुस्तकं शुभं भवतु॥ ॥श्री॥

तिथिनिर्ण·
२५

१२७

राम·
२५